शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
प्राकृतमणिदीपम् आभाषुकाण्ड	–	तंत्र	पूर्ण	–	3/12	~~18~~ 48	संस्कृत	कागद	10	45		

M-2959

॥ ॥ प्राकृतमनोरमाभाषाप्रकाशाराः वाळकृष्णदत्तपुत्रस्य ॥ ॥

॥प्राकृत॥
॥१॥

श्रीगणेशायनमः॥ ॥जयतिमदमुदितमधुकरमधुररुतोकलनकूणितापांगः॥ करविहितगंडकंडूविनोदसुखितोगणाधि
पतिः॥१॥वररुचिरचितप्राकृतलक्षणसूत्राणिलक्ष्यमार्गेण॥बुध्वाचकारवृत्तिंसंक्षिप्तांभामहःस्पष्टां॥२॥ आदेरतः॥
अधिकारोयं॥ ॥यदितऊर्ध्वमनुक्रमिष्यामस्तत् आदेरतस्थानेभवतीत्येवंवेदितव्यं॥ आदिरित्येतत्दापरिछेदसमाप्ते॥ अतइतिस
र्णा॥ अकारविधानात्॥ अतइतितकारग्रहणंसवर्णनिवृत्यर्थं॥१॥ आसमृध्यादिषुवा॥ समृद्धिइत्यादिषुआदेरकारस्याऽकारोदेशो
भवतिवा। समिद्धि। सामिद्धी। पअइ। पाअइ। अहिआरैई। आहिआई॥ मणंसिणी। माणंसिणी। पडिवआ। सरिछं। सारिछं। पडिसिद्धी
पाडिसिद्धी। पसुत्तं। पासुत्तं। पसिद्धी। पासिद्धी॥ अस्सो। आस्सो। समृद्धिप्रकृताभिजातमनस्वनीप्रतिपत्सदृक्षप्रतिस्पर्द्धीप्रसुप्त
प्रसिद्धअश्व। आकृतिगणोयं॥२॥ इदीषत्पक्वस्वप्नवेतसव्यजनमृदंगांगारेषु॥ ईषदादिषुशब्देषुआदेरतःस्थानेइकारादेशोभवति
वेतिनिवृत्तं॥ ईसि। मिक्कं। सिविरणो। वेडिसो। विअणो। मिइंगो। इंगाले॥३॥ लोपोरण्ये॥ अरण्यशब्देआदेरतोलोपोभवति। रणं॥४

॥मनोरमा॥
॥१॥

ऌ क्वान व मल्लिकयोर्वेन॥

ए शय्यादिषु॥ शय्या इत्येवमादिषु शब्देषु आदेरतः एकारादेशो भवति॥ सेज्जा॥ सुंदेरं॥ उक्केरो॥ तेरहो॥ अछेरं॥ येरंतं॥ वल्ली॥ शय्या
सौंदर्य उत्कर त्रयोदश आश्चर्य पर्यंत वल्ली॥ ५॥ ओ बदरे देन॥ बदर शब्दे दकारेण सह आदेरत ओत्वं भवति॥ बोरं॥ ६॥ लवणनव
मल्लिकयो रादेरतो वेन वकारेण सह ओकारः स्यात्॥ लोणं॥ णोमल्लिआ॥ ७॥ मयूरमयूखयोर्य्वा वा॥ मयूरमयूख इत्येनयोर्यूशब्दे
न सह आदेरत ओत्वं भवति वा॥ मोरो मऊरो मोहो मऊहो॥ ८॥ चतुर्थी चतुर्दश्योस्तुना॥ चतुर्थी चतुर्दश्योस्तुना सह आदे
रत ओत्वं भवति वा॥ चोत्थी चउत्थी चोद्दही चउद्दही॥ ९॥ अदातो यथादिषु वा॥ अत इति निवृत्तं॥ स्थानांतरनिर्देशात्॥ यथा
इत्येवमादिषु आत स्थाने अकारो भवति वा॥ जह जहा तह तहा पत्थरो पत्थारो॥ पउअं पाउअं॥ तलवेंटं अं तालवेंटं॥ उक्कव
आउक्कवाअं॥ चमरं चामरं॥ पहारो पहरो॥ चडु चाडू॥ दवग्गी दावग्गी॥ खइअं खाइअं॥ संठविअं संठाविअं॥ हलिओ हालिओ॥
यथ तथा प्रस्तार प्राकृत तालवृंत उत्खात चामर प्रहार चाटु दावाग्नि खादित संस्थापित हालिक॥ १०॥ इत्सदादिषु॥ सदा इत्येवमा
दिषु आत इकारो भवति वा॥ सइ सआ॥ जइ जआ॥ तइ तआ॥ ११॥ इत एत्पिण्डसमेषु॥ पिण्ड इत्येवं समेषु आदेरिकारस्य एकारादेशो भव
ति वा॥ पेण्डं पिण्डं॥ णेद्दा णिद्दा॥ सेंदूरं सिंदूरं॥ धमेल्लं धम्मिल्लं॥ वेंधं विंधं॥ वेल्लू विल्लू॥ पेंडं पिंडं॥ पिण्ड निद्रा सिंदूर धम्मिल्ल बिल्व विल्व

॥ प्राकृत ॥
॥ २ ॥

पिष्टासमग्रहणं संयोगपरस्योपलक्षणार्थं ॥ १२ ॥ अन्त्यपि हरिद्रा पृथिवीषु ॥ पथ्यादिषु शब्दे षिकारस्य अकारो भवति ॥ हलद्दी ॥
पहो ॥ पुहई ॥ १३ ॥ इतेस्तः पदादेः ॥ पदादेरितिशब्दस्य यस्तकारस्तस्मात्परस्य इकारस्य अकारो भवति ॥ इअ ॥ उअह ॥ असहवेहणं ॥
इअ विअसं तीउ विरं ॥ इति पस्य नान्यथा वचनं ॥ इ विक्कसं सश्चिरं ॥ पदादेरिति वचनादिह न भवति ॥ पिओत्ति ॥ १४ ॥ उदिक्षुवृश्चि
कयोः ॥ इक्षुवृश्चिकयोरित उत्वं भवति ॥ उच्छू ॥ विंछुओ ॥ १५ ॥ ओं च द्विधाकृञः ॥ कृधातुप्रयोगे द्विधाशब्दस्य ओकारो भवति ॥ चका
रादुत्वं च ॥ द्विधाकृतं ॥ दोहाइअं ॥ दुहाइअं ॥ द्विधाक्रियते ॥ दोहाइज्जइ ॥ दुहाइज्जइ ॥ १६ ॥ ईः सिंहजिह्वयोश्च ॥ सिंहजिह्वा इत्येतयो
रादेरिकारस्य ईकारो भवति ॥ सीहो ॥ जीहा ॥ चकारोनुक्तसमुच्चयार्थः ॥ तेन वीसं ॥ पवीसं ॥ इत्येवमादि दीर्घत्वं भवति ॥ १७ ॥
ईद्वितः पानीयादिषु ॥ पानीय इत्येवमादिषु आदेरीकारस्य इकारो भवति ॥ पाणिअं ॥ अलिअं ॥ विलिअं ॥ नआणि ॥ करिसो ॥ वि
इअं ॥ नरिअं ॥ गहिरं ॥ पानीय अलीक व्यलीक नदानी करीष द्वितीय तृतीय गंभीर ॥ १८ ॥ एन्नीडापीडकीदृशीदृशेषु ॥ नीडादिषु
इकारस्य एकारो भवति ॥ णेडुः ॥ आमेलो ॥ केरिसो ॥ एरिसो ॥ १९ ॥ उत ओत्तुंडरूपेषु ॥ तुंड इत्येवं रूपेषु आदेरुकारस्य ओकारो भवति
॥ २० ॥ तोंडं ॥ मोत्ता ॥ पोक्करो ॥ पोत्थ ॥ ओलोट्टओ ॥ कोट्टिमं ॥ तुंड मुक्ता पुष्कर पुस्तक लुब्धक कुट्टिम रूपग्रहणं संयोगपरो

॥ मनो
रमा ॥
॥ २

पलक्षणार्थं ॥२०॥ उद्दूखले वा ॥ उलूखल शब्दे दूशब्देन सह उकारस्य औंकारो भवति वा ॥ ओक्खलं उऊहलं ॥२१॥ अन्मुकु
टादिषु ॥ मुकुट इत्येवमादिषु आदे ऋतु स्थाने अकारो भवति ॥ मउडं मउलं ॥ गरुअं ॥ गरुई ॥ जहिट्ठिल्लो सो ॥ अमल्लं ॥ अवरि ॥ मुकुर
मुकुल गुरु गुर्वी युधिष्ठिरसो कुमार्य उपरि ॥२२॥ इत्पुरुषे रोः ॥ पुरुषशब्दे योरेफस्तस्य उकारस्य इकारो भवति ॥ पुरिसो ॥२३॥
उद्दूतो मधूके ॥ मधूक ऊकारस्य उकारो भवति ॥ महुअं ॥२४॥ अद्दुकूले वा लस्य द्वित्वं ॥ दुकूलशब्दे उकारस्य अकारो भवति वा ॥ नत्स
न्नियोगेन वा लकारस्य द्वित्वं ॥ दुअल्लं दुउलं ॥२५॥ एन्नूपुरे ॥ नूपुरशब्दे ऊकारस्य एकारो भवति ॥ णेउरो ॥२६॥ ऋतोऽत् ॥ आदेरृ
कारस्याकारो भवति ॥ तृणं तणं ॥ घृतं घतं ॥ मअं ॥ कअं ॥ वड्ढो वसहो ॥ तृण घृणा मृत कृत वृद्ध वृषभ ॥२७॥ इदृष्यादिषु ॥ ऋष्यादि
शब्देषु आदे ऋकारस्य इकारो भवति ॥ इसी ॥ विसी ॥ गिट्ठी सिट्ठी ॥ सिंगारो ॥ मिअंको ॥ भिंगो ॥ भिंगारो ॥ हिअअं ॥ विइण्हो ॥ विहिं
किससरो ॥ किच्चा ॥ विंछुओ ॥ सिआलो ॥ किई ॥ किसी ॥ किंवा ॥ ऋषि वृषा गृष्टि सृष्टि शृंगार मृगांक भृंग भृंगार हृदय पितृ ह्व
बृंहित कृशर कृत्या वृश्चिक सृगाल कृति कृषि कृपा ॥२८॥ उद्दृत्वादिषु ॥ ऋतु इत्येवमादिषु आदे ऋकारस्य उकारो भवति
उऊ ॥ मुणालो ॥ पुहई ॥ वंदावणं ॥ पाउसो ॥ पउत्तो ॥ विउदं ॥ संवुदं ॥ णिवुदं ॥ वुत्तंतो ॥ परहुओ ॥ माउअं ॥ जामाउअं ॥ ऋतु मृणा

॥प्राकृत॥
॥मनोरमा॥
॥२॥

ल पृथिवी वृंदावन शारद प्रवृत्ति विवृत्त संवृत निर्वृत वृत्तांत परभृत मातृक जामातृक इत्येवमादयः ॥ २९ ॥ अयुक्तस्य ऋ रि
वर्णांतरेणायुक्तस्यादेः ऋकारस्य रिकारो भवति ॥ रिणं रिद्धो ॥ रिच्छो ॥ ऋणं ऋद्धं ऋक्षः ॥ ३० ॥ क्वचिद्युक्तस्यापि वर्णांतरेणायुक्त
स्यापि क्वचिद् ऋकारस्य रिकारो भवति ॥ एरिसो ॥ सरिसो ॥ णारिसो ॥ केरिसो ॥ ३१ ॥ वृषभे वेन ऋ वा ॥ वृषभशब्दे वकारेण सह ऋका
रस्य ऋकारो भवति वा ॥ ऋषभो वसहो ॥ व्यवस्थितविभाषाज्ञानात् छंदःपक्षे न भवति खत्वपक्षे नित्यमेव भवति ॥ ३२ ॥ क्लृप्त
ते इलिः ॥ क्लृप्तशब्दे लृकारस्य इलि इत्ययमादेशो भवति ॥ किलित्तं ॥ नैवमादेशांतरविधानात् प्राकृते ऋकार लृकारौ न भवतः ॥ ३३ ॥
एत इद्वेदना देवरयोः ॥ वेदना देवरयोरादेरेकारस्य इकारो भवति ॥ विअणा ॥ दिअरो ॥ वाअरणे तु हरनैःक्वचित् ॥ वेअणा ॥ केलासे
तैल्लोक्ये शैलशैत्ये एवं न कैलासत्रैलोक्ये ॥ ३५ ॥ दैत्यादिष्वइ ॥ दैत्यादिषु शब्देषु ऐकारस्य अइ इत्ययमादेशो भवति ॥ दइच्चो ॥ दइन्नो ॥
भइरवो ॥ सइरं ॥ वइरं ॥ वइदेसो ॥ वइदेहो ॥ कइअवो ॥ वइसाहो ॥ वइसिअं ॥ वइसंपाअणो ॥ दैत्य च चैत्र भैरव स्वैर वैर वैदेश वैदेह कैतव
वैशाख वैशिक वैशंपायन इत्यादयः ॥ ३६ ॥ दैवे च ॥ दैवशब्दे ऐकारस्य अइ इत्ययमादेशो भवति वा ॥ दइवं ॥ देव्वं ॥ अनादेशपक्षे नि
त्यादित्वाद्वित्वं ॥ ३७ ॥ इत्सैंधवे ॥ सैंधवशब्दे ऐकारस्य इकारो भवति ॥ सिंधवं ॥ ३८ ॥ ईद्धैर्ये ॥ धैर्यशब्दे ऐकारस्य ईकारो भवति ॥
धीरं ॥ देश्य एइ त्यपि ॥ ३९ ॥ ऐतेन एत ओदैरे ऐकारस्य ओकारो भवति सोलो सचेव एवगणे

५

धीरं ॥ ३९ ॥ ऐतोदात्प्रकोष्ठे कस्य वः ॥ प्रकोष्ठशब्दे ओकारस्य अकारो भवति वा ॥ तत्सन्नियोगेन च ककारस्य वत्वं ॥ पवट्ठो पओट्ठो ॥ ४० ॥
औत ओत् ॥ औकारस्य आदेः ओकारो भवति ॥ कोमुई ॥ जोव्वणं ॥ कोत्थुहो ॥ कोसबी ॥ कौमुदी यौवन कौस्तुभ कौशांबी ॥ ४१ ॥ पौरादिष्वउ
पौर इत्येवमादिषु शब्देषु औकारस्य अउ इत्ययमादेशो भवति ॥ पउरो ॥ कउरवो ॥ पौरुसो ॥ कौशले विकल्पः ॥ कोसलो ॥ कउसलो ॥
पौर कौरव पौरुष कौशल आकृतिगणोयं ॥ ४२ ॥ आच्च गौरवे ॥ गौरवशब्दे औकारस्याकारो भवति ॥ चदुत्वं च ॥ गारवं गउरवं ॥ ४३ ॥
उत्सौन्दर्यादिषु ॥ सौन्दर्य इत्येवमादिषु औकारस्य उकारो भवति ॥ सुंदेरो ॥ सुंजाअणो ॥ सुंडो ॥ कुक्खेअओ ॥ दुवारिओ ॥ सौन्दर्य मौञ्जा
यन शौण्ड कौक्षेयक दौवारिक इत्यादयः ॥ ४४ ॥ इति श्रीवररुचिकृत प्राकृतप्रकाशे अज्विधिः प्रथमः परिच्छेदः ॥ १ ॥ श्री ॥
अयुक्तस्यानादौ ॥ अधिकारोयं ॥ इत उत्तरं यद्वक्ष्यामः तदयुक्तस्य व्यंजनस्यानादौ वर्तमानस्य कार्यं भवतीत्येवं वेदितव्यं ॥ ॥
वक्ष्यति कादीनां लोपः ॥ मउडं ॥ मुकुटं ॥ अयुक्तस्येति किं ॥ अग्घो ॥ अक्को ॥ अनादाविति किं ॥ कमल ॥ अयुक्तस्येत्या परिच्छेदसमाप्तेः
अनादाविति आ तत्कारविधानात् ॥ १ ॥ कगचजतदपयवां प्रायो लोपः ॥ कादीनां नवानां वर्णानां अनादौ वर्तमानानां प्रायो बाहु
ल्येन लोपो भवति ॥ कस्य तावत् ॥ मउलो ॥ णउलं ॥ गस्य ॥ साअरो ॥ णअरं ॥ चस्य ॥ वअणं ॥ सूई ॥ जस्य ॥ गअं ॥ रअदं ॥ तस्य ॥ कअं

विआणं दस्य गआ मओ यस्य कई विउलं सुउरिसे सुपुरिसे पुरिस इति यद्यपि उत्तरपदस्य पुरुषशब्दस्यादिस्तथापि
लोपो भवतीत्यनेन ज्ञापनिवृत्तिकारः॥ यथा उत्तरपदादीरो नोदरैवेति यस्य वाउणा णआणं वस्य जीअं दिअहो प्रायोग्रहणात्
यत्र श्रुतिसुखमस्ति तत्र न भवत्येव सुकुसुमं पिअगमणं सममावे अवजले अतुलं आदरो अपारो अजसो सुवस्सणो॥
अयुक्तस्येत्येव सुक्को भग्गो अनादावित्येव कालो गंधे यमुनायामस्य यमुनाशब्दे मकारस्य लोपो भवति जउणा॥ ३॥
स्फटिकनिकषचिकुरेषु कस्य हः अनादावितिवर्त्तते स्फटिकनिकषचिकुरेषु कस्य हकारो भवति लोपापवादः॥ फलिहो णिहसो
चिहुरो॥ ४॥ शीकरे भः शीकरशब्दे ककारस्य भकारो भवति सीभरो॥ ५॥ चंद्रिकायां मः चंद्रिकाशब्दे ककारस्य मकारो भवति॥
चंदिमा॥ ६॥ ऋत्वादिषु तो दः ऋतु इत्येवमादिषु तकारस्य दकारो भवति उदू रअदं आअदे णिव्वुदी आउदी संवुदी सुइदी
आइदी हदो संजदो विउदं संजादो संपदि पडिवत्ती॥ ऋतु रजत आगत निर्वृत्ति संवृत्ति आरति सुकृति आकृति हत संयत वि-
वृत संयात संप्रति प्रतिपत्ति इत्येवमादयः॥ ७॥ प्रतिसरवेतसपताकासु डः प्रतिसरवेतसपताकाशब्देषु तकारस्य डकारो भवति
लोपापवादः॥ पडिसरो वेडिसो पडाआ॥ ८॥ वसतिभरतयोर्हः वसतिभरतशब्दयोस्तकारस्य हकारो भवति वसही भरहो॥ ९॥

गर्भिते णः ॥ गर्भितशब्दे तकारस्य णकारो भवति ॥ गब्भिणं ॥ १० ॥ एरावते च ॥ एरावतेशब्दे तकारस्य णकारो भवति ॥ एरावणो ॥ ११ ॥ प्रदी-
प्तकदंबदोहदेषु दो लः ॥ प्रदीप्तकदंबदोहदशब्देषु दकारस्य लकारो भवति ॥ पलित्तं ॥ कलंबो ॥ दोहलो ॥ अनादावित्यधिकारात् प्रथमदका-
र न लकारः ॥ १२ ॥ गद्गदे रः ॥ गद्गदशब्दे दकारस्य रेफादेशो भवति ॥ गग्गरो ॥ १३ ॥ संख्यायां च ॥ संख्यावचिनि यो दकारस्तस्य रेफादेशो भवति
एआरह ॥ वारह ॥ तेरह ॥ अयुक्तस्येति किं ॥ चउद्दह ॥ अनादावित्येव ॥ किं दह ॥ १४ ॥ पो वः ॥ पकारस्यायुक्तस्यानादिवर्त्तिनो वकारादेशो
भवति ॥ सावो ॥ सवहो ॥ उलवो ॥ प्रायोग्रहणाद्यत्र यो न भवति न तत्रायं विधिः ॥ १५ ॥ आपीडे मः ॥ आपीडशब्दे पकारस्य मकारो भवति ॥ आमे-
लो ॥ १६ ॥ उत्तरीयानीययोर्यो ज्जो वा ॥ उत्तरीयशब्दे अनीयप्रत्ययान्ते च यस्य ज्जो भवति वा ॥ उत्तरीअं ॥ उत्तरिज्जं ॥ रमणीअं ॥ रमणिज्जं ॥
१७ ॥ छायायां हः ॥ छायाशब्दे यकारस्य हकारो भवति ॥ छाही ॥ १८ ॥ कबंधे बो मः ॥ कबंधशब्दे बकारस्य मकारो भवति ॥ कमंधो ॥ १९ ॥
टो डः ॥ टस्यानादिवर्त्तिनोऽयुक्तस्य डकारो भवति ॥ नडो ॥ विडवो ॥ अयुक्तस्येति किं ॥ पट्टसुअं ॥ २० ॥ सटाशकटकैटभेषु ढः ॥ सटाशक-
टकैटभइत्येतेषु टकारस्य ढकारो भवति ॥ २१ ॥ सढा ॥ सअढो ॥ केढवो ॥ २२ ॥ स्फटिके लः ॥ स्फटिकशब्दे टकारस्य लकारो भवति
फलिहो ॥ २३ ॥ डस्य च ॥ डकारस्यायुक्तस्यानादिभूतस्य लकारो भवति ॥ दालिमं ॥ तुलाअं ॥ वलहो ॥ प्राय इत्येव ॥ दिडिमो ॥ णिविडो ॥ २३ ॥
ठो ढः ॥ ठकारस्यायुक्तस्यानादिभूतस्य ढकारो भवति ॥ मढं ॥ जठरं ॥ २४ ॥ अंकोठे ल्लः ॥ अंकोठशब्दे ठकारस्य ल्लकारो भवति ॥

प्राकृतम
५

अंकोल्लो ॥ २५ ॥ फो भः ॥ फकारस्य भकारो भवति ॥ सिभा ॥ सेभालिः ॥ आ ॥ सभरी ॥ सभलं ॥ २६ ॥ खघथधभां हः ॥ खादीनां पंच
मयुक्तानामनादिवर्त्तिनां हकारो भवति ॥ खस्य तावत् ॥ मोहे ॥ मेहलो ॥ घस्य मेहो ॥ जहरणो ॥ थस्य गाहा ॥ सवहो ॥ धस्य ॥ एहा ॥ वहिरो ॥ भ
स्य हः ॥ रसहो ॥ आप इत्येव ॥ परवलो ॥ पलंघणो ॥ अधोरो ॥ अधणो ॥ उवलद्वो इ भावो ॥ २७ ॥ प्रथमशिथिलनिषधेषु ढः ॥ प्रथम
शिथिलनिषध इत्येतेषु पधयोः ठकारो भवति ॥ पठमो ॥ सिढिलो ॥ णिसढो ॥ २८ ॥ कैटभे वः ॥ कैटभशब्दे भकारस्य वकारो
भवति केटवो ॥ २९ ॥ हरिद्रादीनां रो लः ॥ हरिद्रा इत्येवमादीनां रेफस्य लकारो भवति ॥ हलद्दी ॥ चलणो ॥ मुहलो ॥ जहिट्ठिलो ॥ सोमाल
कलुणं ॥ अंगुलं ॥ इंगालो ॥ चिलादो ॥ फलिहा ॥ फलिहो ॥ हरिद्रा चरण मुखर युधिष्ठिर सुकुमार करुणा अंगुरी अंगार किरात प
रिखा परिघ इत्येवमादयः ॥ ३० ॥ आदेर्यो जः ॥ अनादेरिति निवृत्तं ॥ आदिभूतस्य यकारस्य जो भवति ॥ जोव्वणं ॥ जट्ठि ॥ महजसो
जवखो ॥ योव ॥ पुनेपष्ठि मघशाय पक्षेः ॥ ३१ ॥ यष्ट्यां लः ॥ यष्टिशब्दे यकारस्य लकारो भवति ॥ लठ्ठी ॥ ३२ ॥ किराते चः ॥ आ
दिरित्यनुवर्त्तते ॥ किरातशब्दे आदेर्वर्णस्य चकारो भवति ॥ चिलादो ॥ ३३ ॥ कुब्जे खः ॥ कुब्जशब्दे आदेर्वर्णस्य खकारो भवति
खुज्जो ॥ ३४ ॥ दोलादंडदशनेषु डः ॥ दोला दंड इत्येषामादेर्वर्णस्य डकारो भवति ॥ डोला ॥ डंडो ॥ डसणो ॥ ३५ ॥ परुषपरिघपरिखासु फः ॥

राम
५

परुषपरिघपरिखा इत्येतेषु आदेर्वर्णस्य फकारो भवति॥ फरुसो। फलिहो। फलिहा। पनसशब्देपि पकारस्य फकारादेश
इष्यते। फणसो॥ ३६॥ विसिन्यां भः। विशिनीशब्दे आदेर्वर्णस्य भकारो भवति॥ भिसिणी॥ स्त्रीलिंगनिर्देशो नपुंसके न भवति॥
विसं॥ ३७॥ मन्मथे वः। मन्मथशब्दे आदेर्वर्णस्य वकारो भवति। वम्महो॥ ३८॥ लाहले णः॥ लाहललांगललांगुलेषु वा णः
एषु शब्दस्यादेर्वर्णस्य वा णकारो भवति॥ णाहलो। लहणो लो। णांगलो। लांगलो। णंगुलं। लांगूलपाठांतरं॥ लाहलशब्दे॥
आदेर्वर्णस्य णकारो भवति। णाहलो॥ ३९॥ षट्शावकसप्तपर्णेषु छः॥ षट्शावकसप्तपर्ण इत्येषामादेर्वर्णस्य छकारो भवति।
छट्ठी। छमुहो छावअं। छत्तवण्णो॥ ४०॥ नो णः सर्वत्र। आदेरिति निवृत्तं॥ सर्वत्रायुक्तस्य नकारस्य णकारो भवति। णई। कणअं।
वअणं। माणुसो। अयुक्तस्येति किं। कंदरा। अंतरं। बंधुरो॥ ४१॥ शषयोः सः। सर्वत्र शकारषकारयोः सकारो भवति। शस्य। सद्दो।
णिसा। अंकुसो। षस्य। संढो। सेवहे। वृषभः। कसाअं॥ ४२॥ दशादिषु हः॥ दश इत्येवमादिषु शकारस्य हकारो भवति। दह। एआ
रह। बारह। तेरह॥ ४३॥ संख्यायां वा। संख्यायां गम्यमानायां वा दशशब्दस्य हत्वं भवति॥ दहमुहो। दहबलो। दसबलो। दहरहो॥
दसरहो॥ ४४॥ दिवसे सस्य। दिवसशब्दे सकारस्य हकारो भवति॥ दिअहो॥ स्नुषायां ण्हः। स्नुषाशब्दे षकारस्य ण्हकारो भ

॥प्राकृतम॥
॥६॥

इति श्रीवररुचिविरचिते प्राकृतप्रकाशे द्वितीयः परिच्छेदः ॥ २ ॥ ॥ उपरि लोपः कगडतदपषसां ॥ १ ॥ कादीनामष्टानां युक्तस्यो
परि स्थितानां लोपो भवति। कस्य नावत्तं। भत्तं। सित्थं। गस्य मुद्धो। सिणिद्धो। डस्य खग्गो। सज्जो। तस्य उप्पलं। उप्पा। ओ
द्दस्य मुग्गो। मग्गारो। पस्य सुत्तो। पज्जत्तो। षस्य गोट्ठी। णिट्ठुरो। सस्य खलिअं। णेहो ॥ २ ॥ अधो मनयां। मकारन
कारयकाराणां युक्तस्याधः स्थितानां लोपो भवति। मस्य सास्से। जुग्गं। रस्सी। नस्य णग्गो। यस्य सोम्मो। जोग्गो ॥ ३ ॥ सर्वत्र
लवरां ॥ लकारवकाररेफाणां युक्तस्योपर्यधः स्थितानां लोपो भवति ॥ लस्य उक्का। वक्कलं। उपथवो। विक्कवो। वस्य लोद्ध
ओ। पिक्कं। रस्य अक्को। पक्को ॥ द्रे रो वा। द्र इत्येवं रेफस्य लोपो भवति। द्रोहो। दहो। चंद्रो। चंदो ॥ ४ ॥ सर्वज्ञतुल्येषु ञः। सर्वज्ञ
इत्येवं तुल्येषु ञकारस्य लोपो भवति। सव्वण्णो। इंगिअण्णो। जाणाते यग्निप्येवं रूपाणि न च ञलोपः ॥ ५ ॥ श्मश्रुश्मशानयोरादेः। श्मश्रु
श्मशानयोरादेर्वर्णस्य लोपो भवति। मस्सू। मसाणं ॥ ६ ॥ मध्याह्ने हस्य। मध्याह्नशब्दे हकारस्य लोपो भवति। मज्झण्णो ॥ ७ ॥
ह्नल्मेषु नलमां स्थितिरूर्ध्वं। ह्नल्मेष्वित्येतेषु अधः स्थितानां नकारलकारमकाराणां स्थितिरूर्ध्वमुपरिष्टाद्भवति। ह्नस्य ॥
पुव्वण्हो। अवरण्हो। ल्हस्य कल्हारं। अल्हादो। ल्मस्य वम्हणो ॥ ८ ॥ युक्तस्य अधिकारोयं आपरिच्छेदपरिसमाप्तेः॥ यदित

॥राम॥
॥६॥

ऊर्ध्वमनुक्रमिष्यामो युक्तस्येत्येवं न द्वे इति यं । वक्ष्यति । अस्थिनि । अठ्ठी यत्र ग्रहणं हलोत्यस्य माभूत ॥ ९ ॥ ष्टस्य ठः । ष्ट इत्ये
तस्य युक्तस्य ठकारो भवति । लट्ठी दिट्ठी ॥ १० ॥ अस्थिनि । अस्थिशब्दे युक्तस्य ठकारो भवति अठ्ठी ॥ ११ ॥ स्तस्य थः । स्तशब्दस्य थ
कारो भव । उपरिलोपापवादः । हत्थो । समत्थो । पुई । पव । ओ । को । भल ॥ १२ ॥ न स्तंबे । स्तंबशब्दे स्तस्य थकारो न भवति । तंबो ॥ १३ ॥
स्तंभे खः । स्तंभशब्दस्तस्य खकारो भवति । खंभो ॥ १४ ॥ स्थाणावहरे । स्थाणुशब्दे युक्तस्य खकारो भवति । खंभो ॥ १५ ॥ अहरे हरे । भिपेघ
न भवति ॥ १६ ॥ खाइवो ॥ १६ ॥ कार्य्यशय्याभिमन्युन्नः । कार्य इत्येतस्य । शय्याभिमन्युशब्दयोश्च युक्तस्य न्नकारो भवति । कज्जं । सेज्जा
अहिमज्जू ॥ १७ ॥ तूर्यधैर्यशौर्याश्चर्यपर्यन्तेषु रः । तूर्यधैर्यशौर्याश्चर्यपर्यन्त इत्येतेषु शब्देषु र्यस्य रेफादेशो भवति । तूरं । धीरं । सुंद
अच्छेरं । पेरंतं ॥ १८ ॥ सूर्ये वा । सूर्यशब्दे र्यकारस्य फरादेशो भवति । सूरो । सुज्जो ॥ १९ ॥ चौर्यसमेषु रिअं । चौर्यसमेषु रिअ मित्ययमादे
शो भवति । चोरिअं । सोरिअं । वीरिअं । चौर्यशौर्यवीर्यसमग्रहणादाकृतिगणोयं ॥ २० ॥ पर्यस्तपर्याणसौकुमार्येषु ल्लः । पर्यस्त
पर्याणसौकुमार्य इत्येतेषु र्य इत्येतस्य ल्लकारो भवति । पल्लत्थं । पल्लाणं । सोअमल्लं ॥ २१ ॥ त्तस्य टः । त्त इत्येतस्य टकारो भवति । केव
ट्टओ । घावट्टओ । वट्टई ॥ २२ ॥ पत्तने । पत्तनशब्दे युक्तस्य टकारो भवति । पिट्टणं ॥ २३ ॥ न धूर्त्तादिषु । धूर्त इत्येवमादिषु त्त इत्येतस्य

प्राकृत
७

टकारो न भवति। धुत्तो। कित्ती। वत्तमाणं। वत्ता। आवत्तो। संवत्तं। अणिवत्तओ। वत्तिआ। अत्तो। कत्तरी। मुत्ती॥ धूर्तकीर्ति
वर्तमानवार्ता आवर्त संवर्त कनिवर्त कवर्तिक आर्त कर्तरि मूर्त इत्यादयः॥२४॥ गगर्ते डः॥ गगर्तशब्दे युक्तस्य डकारो भ-
वति। गड्डो॥२५॥ गर्दभसंमर्दवितर्दिविच्छर्दिषु र्दस्य॥ गर्दभसंमर्दवितर्दिविच्छर्दि इत्येषु र्दस्य डो भवति। गड्डहो। समड्डो। विअड्डी। विछड्डी॥२६॥
स्थ्यघ्यां च्छज्झाः॥ स्थ्य घ्य इत्येतेषां च्छ ज्झ इत्येते यथासंख्येन भवंति। पच्छं। थ्यस्य। मिच्छा। पच्छं। घ्यस्य। विज्झो। विज्झं॥२७॥ ध्यह्ययो-
र्झः॥ ध्य ह्य इत्येतयोर्झकारो भवति। ध्यस्य। मझं। अझ्झओ। ह्यस्य। वझओ। गुझं॥ मध्य। अध्याय। सह्य। गुह्यक॥२८॥ ष्कस्कक्षां खः॥
ष्कस्कक्षां खकारो भवति। ष्कस्य। सुक्खं। पोक्खरो। स्कस्य। खंदो। खंधो। क्षस्य। खओ। जक्खो॥२९॥ अक्ष्यादिषु छः॥ अक्षि इत्येवमादिषु
क्षकारस्य छकारो भवति। अच्छी। लच्छी। छणं। छीरं। छुद्दो। उच्छित्तो। सरिछो। उछू। उछा। छारं। रिछो। मच्छिआ। छुअं। छुरं। छेत्तं। वच्छो।
दच्छो। कुच्छी॥ अक्षि लक्ष्मी क्षण क्षीर क्षुद्र उत्क्षिप्त सदृक्ष इक्षु उक्षा क्षार ऋक्ष मक्षिका क्षत क्षुर क्षेत्र वक्ष सदृक्ष कुक्षि इत्येवमा-
दयः॥३०॥ क्षमावृक्षक्षणेषु वा॥ क्षमावृक्षक्षणेषु क्षकारस्य छकारो भवति वा। छमा। खमा। वच्छो। रुक्खो। छणं। खणं। वृक्षशब्दे ऋ-
कारस्याकारत्वे क्षणशब्दे वोत्सवोऽभिधीयते छणमित्यत्र॥३१॥ ष्मपक्ष्मविस्मयेषु म्हः॥ ष्म इत्येतस्य पक्ष्मविस्मयशब्दयोश्च

मनोरमा
७

युक्तस्य त्सकारादेशो भवति ॥ भस्य । भिस्सो । कुत्सा । पत्सो । विस्सजु ॥ ३२ ॥ ष्णस्नह्नक्ष्णश्नां ण्हः । ष्णादीनां ण्ह इत्ययमादेशो भ
वति । ह्नस्य । वण्ही । जण्हू । स्नस्य । ण्हाणं । पण्हुदं । ष्णस्य । विण्हू । कण्हो । क्ष्णस्य । सण्हं । जिण्हं । श्नस्य । पण्हो । सिण्हो । वह्नि । जह्नु । स्ना
न । प्रस्नुत । विष्णु । कृष्ण । श्लक्ष्ण । तीक्ष्ण । प्रश्न । शिश्न ॥ ३३ ॥ चिह्ने न्धः । चिह्नशब्दे युक्तस्य न्ध इत्ययमादेशो भवति । चिन्धं ॥ ३४ ॥ ष्पस्पयोः फः ।
ष्पस्पयो इत्येतस्य फ इत्ययमादेशो भवति ॥ पुप्फं । सप्फं । णिप्फो । ... ॥ ३५ ॥ स्पस्य सर्वत्र स्थितस्य । स्प इत्येतस्य सर्वत्र स्थितस्य फ इत्यय
मादेशो भवति । फंसो । फंदणं ॥ ३६ ॥ सिचि । स्पस्य सि इत्ययमादेशो भवति । पाडिसिद्धी ॥ ३७ ॥ बाष्पेऽश्रुणि हः । बाष्पशब्दे ष्प इत्येतस्य
हकारो भवति । अश्रुणि वाच्ये बाहो । अश्रुणि किं । बप्फो । बाष्प ऊष्मा ॥ ३८ ॥ कार्षापणे । कार्षापणशब्दे युक्तस्य हकारो भवति । काहा
वणो ॥ ३९ ॥ श्चत्सप्सां छः । श्चत्सप्स इत्येतेषां छकारो भवति । श्चस्य । पच्छिमं । अच्छेरं । त्सस्य । वच्छो । वच्छरो । प्सस्य । लिच्छा । जुगुच्छा ॥ ४० ॥
वृश्चिके ञ्छुः । वृश्चिकशब्दे श्चस्य ञ्छु इत्ययमादेशो भवति । विञ्छुओ ॥ ४१ ॥ नोत्सुकोत्सवयोः । उत्सुक उत्सव इत्येतयोः त्स
इत्येतस्य छकारो न भवति । श्चत्सप्सां छ इति प्राप्ते प्रतिषिध्यते । ऊसुओ । ऊसवो ॥ ४२ ॥ न्मो मः । न्म इत्येतस्य म इत्ययमादेशो भवति ।
म्नो अधोलोपे प्राप्ते । जम्मो । वम्महो ॥ ४३ ॥ म्नज्ञोः पंचाशत्पंचदशेषु णः । म्नज्ञ इत्येतयोः पंचाशत्पंचदशशब्दयोश्च युक्तस्य णकारो भ
वति । म्नस्य । पज्जुण्णो । ज्ञस्य । जण्णो । विण्णाणं । पंचाशत् । पण्णासा । पंचदश । पण्णरहो ॥ ४४ ॥ तालवृन्ते ण्टः । तालवृन्ते युक्तस्य

॥प्राकृत॥ ण इत्ययमादेशो भवति । तालवेण्टं ॥ ४५ ॥ भिंदिपाले ण्डः ॥ भिंदिपाले न्द्रौ युक्तस्य ण्ड । ण्ड इत्ययमादेशो भवति । भिंडिवालो ॥ ४६ ॥ विह्व-
॥८॥ ले भ्भहौ वा ॥ विह्वलशब्दे युक्तस्य भकार हकारौ वा भवतः । वेब्भलो । विहलो ॥ ४७ ॥ आत्मनि पः ॥ आत्मशब्दे युक्तस्य पकारो भवति । अप्पा ॥ ४८ ॥
क्मस्य ॥ क्म इत्येतस्य पकारो भवति । रुप्पं । रुप्पिणी । योगविभागो नित्यार्थः ॥ ४९ ॥ शेषादेशयोर्द्वित्वमनादौ ॥ युक्तस्य यौ शेषादेशभूतौ
तयोरनादौ वर्त्तमानयोर्द्वित्वं भवति । शेषस्य तावत् । भुत्तं । भग्गो । णक्को । उक्का । आदेशस्य । लट्ठी । दिट्ठी । हत्थो । अनादाविति किं ॥
खलिअं । खंभो । थवअं ॥ ५० ॥ वर्गेषु युजः पूर्वः ॥ युक्तस्य यौ शेषादेशौ अनादिभूतौ तयोर्द्वित्वेपि विहिते । अधऊर्ध्वेनयोर्वर्गेषु वर्गीयद्वि-
तीयचतुर्थौ वाहितस्तस्य पूर्वः प्रथमस्तृतीयो वा भवति । यत्र च वर्गेषु युक्तस्य प्रथमस्तृतीयो द्वित्वेन विधीयते तत्र तावेव भवतः । शे-
षस्य वक्खाणं । अग्घो । मुच्छा । णिज्झरो । णिव्वेरो । आदेशस्य । दिट्ठी । लट्ठी । कच्छो । लुद्धो । विप्फरिसो । णित्थारो । जक्खो । लच्छी ।
अट्ठी । पुप्फं ॥ ५१ ॥ नीडादिषु ॥ नीड इत्येवमादिषु अनादौ वर्त्तमानस्य वा द्वित्वं भवति । णेड्डं । एन्नोपडी । पोड इत्यादिना । एत्तं । सोत्तं । पेम्मं ।
वाहित्तं । उज्जुअं । जेत्तिअं । जोव्वणं ॥ नीडस्रोतसप्रेमव्याहृत ऋजु जनकयौवनमित्यादयः ॥ ५२ ॥ आम्रताम्रयोर्वः ॥ आम्रताम्र
इत्येतयोर्द्वित्वे न वकारो भवति । अंबं । तंबं ॥ ५३ ॥ न रहोः ॥ शेषादेशयोरपि रेफहकारयोर्द्वित्वं न भवति । धीरं । तूरं । जीहा । वाहो ॥ ५४ ॥ ॥मनोरमा॥
आङो ज्ञस्य ॥ आङो नरस्य ज्ञ इत्यस्यादेशस्य द्वित्वं न भवति । आणा । पाणा । णत्तो । आ ज्ञा । आज्ञप्तिः । आङ इति किं । सस्सा । संज्ञा । आदेशस्येति । ॥राम ॥८॥

कि। अकिवंनं। आक्षिप्तं ॥ ५५ नबिंदुपरे अनुस्वारे द्वित्वं न भवति संझा। संकंतो। संघ्या संकांत ॥ ५६ समासे वा समा
से शेषादेशयोर्द्वित्वं भवति। णइग्गामो। णइगामो। कुसुमप्पअरो। कुसुमपअरो। देवत्थुई। देवथुई। आणालक्खंभो।
आणालखंभो ॥ ५७ सेवादिषु च। सेवाइत्येवमादिषु च नादोवा द्वित्वं भवति। सेव्वा। सेवा। एक्कं। एअं। णक्खो। णहो। दैव्वं
दइवं। असिव्वं। असिवं। तेल्लोक्कं। तेलोअं। णिहित्तं। णिहिअं। दुहिअं। अस्सो। असो। ईस्सरो। ईसरो। विस्सासो। वीसासो। णि
स्सासो। णीसासो। रस्सो। रसी। मित्तो। मिअ। पुस्सो। पुसो। सेवा एव न ख दैव असिव त्रैलोक्य निहित नख एक कर्णिकार
दीर्घरात्रि दुःखित अश्व ईश्वर विश्वास निश्वास रस्मि मित्र पुष्प उभय त्र विभाषेयं। सेवादीनाम ग्राह्य दीर्घादीनां च ग्राह्य ॥ ५८
विप्रकर्षः। अधिकारोयमापरिच्छेदसमाप्तेर्युक्तस्य विप्रकर्षो भवति ॥ ५९ क्लिष्टश्लिष्टरत्नक्रियाशार्ङ्गेषु तत्स्वरवत्पूर्वस्य ॥
क्लिष्टादिषु युक्तस्य विप्रकर्षो भवति। विप्रकृष्टस्य च यः पूर्वो वर्णो निरवद्योलस्य तत्स्वरता भवति। तेनैव पूर्वेण स्वरेण पूर्वो वर्णः
साक्का भवतीत्यर्थः। किलिट्ठं। रअणं। किरिआ। सारंगो ॥ ६० कृष्णे वा। कृष्णशब्दे युक्तस्य वा विप्रकर्षो भवति। पूर्वस्य च तत्स्व
रता। व्यवस्थितविभाषेयं। तेन वर्णे नित्य विप्रकर्षः। विष्णौ तु न भवत्येव। कसणो। कण्हो। ६१ श्रीःह्रीःक्रीतःक्रान्तक्लेशम्लान

पूर्वस्य अकारस्तत्स्वरता भवति । अ

स्वप्नस्पर्शहर्षार्हगर्हेषु ॥ श्रीह्रीक्रीतक्रांतक्लेम्लान स्वप्नस्पर्शहर्षार्हगर्हेषु युक्तस्य विप्रकर्षो भवति । पूर्वस्य इकारस्तत्स्व
रता भवति । सिरी । हिरी । करीतो । किलंतो । किलेसो । मिलाणो । सिविणो । फरिसो । हरिसो । अ रिहो । गरिहो ॥ ६२ ॥ अः क्ष्मा श्लाघयोः
क्ष्माश्लाघा इत्येतयोर्युक्तस्य विप्रकर्षो भवति । खमा । सलाहा ॥ ६३ ॥ स्नेहे वा । स्नेहशब्दे युक्तस्य विप्रकर्षो वा भवति । पूर्वस्य च
अकारस्तत्स्वरता । सणेहो । णेहो ॥ ६४ ॥ उः पद्मतन्वीसमेषु । पद्मशब्दे तन्वी इत्येवं समेषु च युक्तस्य विप्रकर्षो भवति पूर्वस्य
उकारस्तत्स्वरता । पउमं । तणुई । लहुई ॥ ६५ ॥ ज्यायामीत् । ज्याशब्दे युक्तस्य विप्रकर्षो भवति पूर्वस्य च ईकारस्तत्स्वरता
जीआ । इवेद्व । इवशब्दे द्व इति सर्वत्र निपात्यते । पाणद्वधणं । विंझद्वसेलो । प्राणा इव धनं । विंध्य इव सखी ॥ ६६ ॥ इति श्रीवर
रुचिमिश्रविरचिते प्राकृतप्रकाशे मनोरमायां वृत्तौ तृतीयपरिच्छेदः ॥ ३ ॥ ॥ संध्यावचामज्लोपविशेषा बहुलं । अ यामि
ति प्रत्याहारग्रहणं । अजिनि च संधौ वर्त्तमानानामचां स्थाने अजिविशेषा लोपविशेषाश्च बहुलं भवति । अजिविशेषस्तावत्
पाठांतरं । कसमरो । कलिम्मारो । वासेसि । वासइसि । व्यासऋषिः । सरलहः । सिरोवेअणा । स्विदाईः । सेउल्लो । क्वचिद्दीर्घः । रुअ अंतं
रूअंअंतं । बहिमूलं । वेणुवणं । क्वचिद्ध्रस्वः । जउणाअडं । जउणाअडं । णइसोत्तं । णईसोत्तं । बहुमुहं । बहूमुहं । क्वचिन्नित्यं ॥

पइं। सुअं। सोअमछं। कुसं। ओवो। जुवइजणो। एउअ। अविणो। लिलुवणं। मणसिला। पइवो। हरो। वाकुबलो। क्वचिल्लोपः।
राउलं। नोऽअउलं।। वाविडं। वाअविडं। वावडणं। वाअवडणं। चक्कोरो। चकोआरो। कुंभारो। कुंभआरो। केणावी। तुस्से न्न। तुले
रता। जउणाअडं। जउणाअडे। राउसोन्नो। राईसोन्नो। बहुमुहं। बहूमुहं। कम्भकरं। सिरोवेअणा। सिरवेअणा। पीआ। पीअं
सीअं। सीअं। सब्बोमूअं। सब्बोमूओ। लोपविशेषाः। राउलं। राउलं। तूअइं। सुवइं। पीलइं। णवरिइं। सुवसिद्धो। पवणुइअं
संयोगपरे सर्वत्र पूर्वस्याचो लोपः।। क्वचिन्नित्यं। क्वचिदन्यदेव। बहुलग्रहणात्। तेनान्यदपि लाक्षिणिकं कार्यं भवति।। १ ।।
उदुंबरे दोर्लोपः। उदुंबरशब्दे दुइसेतस्य लोपो भवति। उंबरं।। २ ।। कालायसे यस्य वा। कालायसशब्दे यकारस्य लोपो भवति। कालासं।
कालायसं।। ३ ।। भाजने जस्य। भाजनशब्दे जकारस्य वा लोपो भवति। भाणं। भाअणं। यावदादिषु वस्य। यावदित्येवमादिषु वकार
स्य वा लोपो भवति। जा। जाव। ता। ताव। पारा। पारावआ। अणुत्तंतं। अणुवत्तंतं। जीअं। जीविअं। एअं। एवं। एअ। एव। कुअलं
कुवलअं। यावत्। तावत्। पारावत। अनुवर्त्तमान। जीवित। एवं। एव। कुवलयमित्यादयः।। ५ ।। अन्त्यस्य हलः। लोप इत्येव वेति निवृत्तं
शब्दानां योन्त्यो हल् तस्य लोपो भवति। जसो। णासो। सरो। कम्मो। जाव। ताव।। ६ ।। स्त्रियामात्। स्त्रियां वर्त्तमानस्यान्त्यस्य हल आकारो
भवति। लोपापवादः। सरिआ। पडिवआ। वाआ।। ७ ।। रो रा। स्त्रियामन्त्यस्य हलो रेफस्य रा इत्ययमादेशो भवति। धुरा। गिरा।। ८

नविद्युति ॥ विद्युत्शब्दे आकारादेशो न भवति ॥ किंतु अंत्यहलो लोपः ॥ विज्जू ॥ ९ ॥ शरदो दः ॥ शरच्छब्दस्यांत्यहलो दो भवति
सरदो ॥ १० ॥ बहिःशब्दे सस्य हलो रो भवति ॥ बाहिरं ॥ आसम्ध्यादिषु वैसानं ॥ ककुभो हः ॥ ककुभोंत्यस्य हलो ह इत्ययमादेशो भवति ॥ ककुहा ॥ दि
क्प्रावृषोस्सः ॥ दिक्शब्दस्यांत्यहलः प्रावृट्शब्दस्यापि सकारो भवति ॥ दिसा ॥ पाउसो ॥ ११ ॥ मो बिंदुः ॥ अंत्यस्य हलो मकारस्य बिंदुर्भव
ति लोपापवादः ॥ अहं ॥ वच्छं ॥ भद्दं ॥ अग्गिं ॥ वहुं ॥ वणं ॥ धणं ॥ १२ ॥ अचि मश्च ॥ अचि परतो मो भवति वा ॥ फलं सव हरइ ॥ फलं अ
व हरइ ॥ १३ ॥ नञोर्हलि ॥ नकारञकारयोर्हलि परतो बिंदुर्भवति ॥ मकारश्च ॥ अंसो ॥ अस्सो ॥ कंसो ॥ कस्सो ॥ जस्य ॥ वंचणीअं
वञ्चणीअं ॥ विंझो ॥ विञ्झो ॥ १४ ॥ वक्रादिषु ॥ वक्रादिषु शब्देषु बिंदुरागमो भवति ॥ वंकं ॥ तंसं ॥ हंसो ॥ अंसू ॥ मंसू ॥ गुंठो
सत्थं ॥ मणंसिणी ॥ दंसणं ॥ फंसो ॥ वंको ॥ पडिंसुदं ॥ अंसो ॥ अहिमुंको ॥ वक्र त्र्यस्र ह्रस्व अश्रु श्मश्रु गृष्टि मूर्द्धन् मनस्विन्
दर्शन स्पर्श विरागी प्रतिश्रुत अश्व अभिमुक्त इत्यादयः ॥ १५ ॥ मांसादिषु वा ॥ मांसादिषु शब्देषु वा बिंदुः प्रयोक्तव्यः ॥ मंसं ॥ मासं ॥ कहं
कह ॥ ताहणं ॥ तामगाति हिंति ॥ असुं ॥ असु ॥ तं इयम पठितो मांसादिर्गणः ॥ यत्र क्वचिद्वृत्तभंगभयात्प्रयुज्यमानः क्रियमाणः ॥ मनोरमा ॥
श्च बिंदुर्भवति स मांसादिषु द्रष्टव्यः ॥ १६ ॥ शषि तद्वर्गांतः ॥ शषि परतो बिंदुस्तद्वर्गांतो वा भवति ॥ सङ्का ॥ सङ्खो ॥ अङ्को ॥ अंको ॥ सञ्चरइ ॥ ॥ राम ॥
संचरई ॥ सम्पत्ती ॥ सत्ति ति किं ॥ अंसे ॥ वाधिकारे तु यं के ॥ बिंदु ॥ संका ॥ संखो ॥ १७ ॥ ॥ १० ॥

नसांतप्रावृट्शरदः पुंसि ॥ नकारांतौ सकारांतौ च प्रावृट्शरदौ च पुंसि प्रयोक्तव्याः नांताः केम्मो जम्मो
वम्मो सांताः जसो। तसो। सरो। पाउसो। सरदो ॥ १८ ॥ नशिरोनभसी ॥ शिरस नभस इत्येतौ न पुंसि प्रयोक्त-
व्यौ सिरं। णहं ॥ १९ ॥ एषाक्षिप्रश्नाः स्त्रियां वा ॥ एष अक्षि प्रश्न इत्येते स्त्रियां वा प्रयोक्तव्याः पुठो। पुठं। अच्छी अच्छि
पराहो। पराहो ॥ २० ॥ ओ वापयोः ॥ अव अप इत्येतयो रूपसर्गयोर्वा ओत्वं भवति। ओहासो। अवहासो। ओसरि। ओ। अवसरिअं ॥ २१ ॥
तल्त्वयोर्दात्तणो ॥ तल् त्व इत्येतयोः प्रत्यययोर्यथासंख्यं दा त्तण इत्येतावादेशौ भवतः। पीणदा। मूढदा। पीणत्तणं। मूढत्तणं ॥ २२ ॥
त्तोउण ॥ क्त्वाप्रत्ययस्य उण इत्ययमादेशो भवति। घेतुण। सोडुन। काडुन। दाडुन ॥ २३ ॥ तेनेरवः शीले। शीले यत्तेन प्र-
यो विहितस्य इर इत्ययमादेशो भवति। भ्रमणशीलो। भवसिरो। हसनशीलो। हसिरो ॥ २४ ॥ आल्विल्लोल्लालन्तेन्तामेन्तुपः ॥
आलु इल्ल उल्ल आल वन्त इन्त इत्येते आदेशा मतुपस्थाने भवंति। ईसालु। णिद्दालु। इल्ला वि। आइल्लो। मा भाइल्लो। उल्ला वि। आ-
तुल्लो। आल। धणालो। सद्दालो। वंत। धणवंतो। जोण्णवंतो। इन्त। ऐसाइंते। पाणइत्तो यथादर्शनमेते प्रयोक्तव्याः। न सर्वे सर्वत्र ॥ २५ ॥
विद्युत्पीताभ्यां लः ॥ विद्युत्पीत शब्दाभ्यां परतः स्वार्थे प्रत्ययो लो भवति। विज्जू विज्जुली। पीअ। पीअलं ॥ २६ ॥ करेण्वां रणोः

॥प्राकृतम॥
॥१२॥

अ३

स्थिपरिवत्तिः करेणुशब्दे रेफणकारयोः स्थिपरिवत्तिर्भवति। कणेरू। पुंसि न भवति। करेणू ॥२७॥ आलाने लनोः॥ आ
लो नशब्दे लकारनकारयोः हलान्तयोः स्थितिपरिवृत्तिर्भवति भवति। आणालखंभो ॥२८॥ महाराष्ट्रे हरोः॥ महाराष्ट्रशब्दे ह
काररेफयोः व्यत्ययः स्यात्। मरहट्ठं॥ रस्वीष्ट्रस्यठः। रे दीर्घो नोपधादिषु वेति ह्रस्वत्वं॥ ३०॥ वृहस्पतौ वहो र्भः॥ वृहस्पतिशब्दे व
कारहकारयोर्यथासंख्यं भकारहकारौ भवतः। भअप्फई॥ ३१॥ मलिने लिनो इलवा॥ मलिनशब्दे लिकारनकारयोर्यथासं
ख्यं इकारलकारौ भवतः। वा। मइलं। मलिणं॥ ३२॥ गृहे घरोऽपतौ॥ गृहशब्दे घर इत्ययमादेशो भवति। अपतौ पतिशब्दे परतो
न भवति। घरं। घरं भवनं। अपतौ किं। गहवई॥ ३३॥ दाढादयो बहुलं॥ दाढा इत्येवमादयः शब्दाः बहुलं निपात्यन्ते। दंष्ट्रादि
षु। दंष्ट्रा। दाढा। इदानीं। एण्हिं। दुहिता। दिधी। चातुर्यं। चाउलिअं। मेडूकं। मडुरो। गृहे निहितं। घरणिहितं। उत्पले। कंदोट्टं।
गोदावरी। गोला। ललाटं। णिडालं ॥३४॥ इति वररुचिते प्राकृतप्रकाशे चतुर्थः परिच्छेदः॥ अत ओत्सोः॥ अकारान्तात्
परस्य सोः स्थाने ओत्वं भवति। वच्छो। वसहो। पुरिसो॥ १॥ जस्शसोर्लोपः॥ अत इत्यनुवर्तते। अकारान्तस्य परं यो जस्
शसौ तयोर्लोपो भवति। वच्छा सोहंति। जस्शसोः ङस्यामसु दीर्घत्वे कृते पश्चाल्लोपो जसः। वच्छे णिआ। अंछहा। एच सुपीति। एवं राम
१२

कृते त्रासो ल्लोपः ॥२॥ अतो मः। अकारांतस्यानंतरं यो म द्वितीयैकवचनं तदकारस्य लोपो भवति। वच्छं येकवद्या मो बिंदुरिति विंदुः
॥३॥ यमो र्से: अतोनंतरं टामो रूतीयैकवचन षष्ठीबहुवचनयोः ण कारो भवति। वच्छेण। वच्छाण। एव सुपोति एत्वं। जस्शस्
संङंस्यास्सु दीर्घः॥४॥ भिसो हिं। अतो अनंतरस्य भिसो हिं भवति। वच्छेहिं। एच सुपीति एत्वं॥५॥ जसेरादो दुहयः। अतो अका
रस्यानंतरस्य जसेः पंचम्येकवचनस्य स्थाने आदो दु हि एते आदेशा भवंति। वच्छा। वच्छाहो। वच्छादु। वच्छाहि। जस्शस्ङंस्या
स्स दीर्घत्वं॥६॥ भ्यसो हिंतो सुंतो। अतोनंतरस्य भ्यसो हिंतो सुंतो इत्येतावादेशौ भवतः। वच्छाहिंतो। वच्छासुंतो। एच सुपीति
चकारेण दीर्घत्वं॥७॥ ङसो ङसेः अतोनंतरस्य ङसेः स्स आदेशो भवति। वच्छस्स॥ ङे रेम्मी॥ अतोनंतरस्य ङे रेम्मी त्यादेशो भव
तिर्थव छेसु एच सुपीति एत्वं॥८॥ जस्शस्ङस्यास्सु दीर्घः जसादिषु परेतो अतो दीर्घो भवति। वच्छासो [illegible] सो हेतिा नस्स
स्सो ल्लोप इति जसो लोपः। वच्छाहो। आगदो। वच्छादु। वच्छाहि ङसेरादो दुहयः वच्छाण। टामो र्सः॥१०॥ एच सुप्यङिङसोः
अत अकार एत्वं भवति। चकाराद्दीर्घश्च। सुपि परेतो ङि ङसी वर्जयित्वा। वच्छेपेच्छह। जस्शसोर्लोपः। वच्छेण। टामो र्सः
वच्छेहिं। वच्छेसु। चकाराद्दीर्घश्चेति। वच्छाहिंतो। वच्छासुंतो। भ्यसो हिंतो सुंतावितिा अङिङसोरिति किं। वच्छम्मि। वच्छस्स॥

७ वच्छो। ङसि
ङसिश्च लो
पः। वच्छम्मि
८ सुपः सुः अ
तोनंतरस्य सु
पः सुरादेशो
भवति। वच्छेसु
७

॥प्राकृतम॰
॥१२॥

॥११॥ क्वचिन्ङसिङस्योर्लोपः। अनोः ङसिङि इत्येतयोः परतः क्वचिल्लोपो भवति। वच्छादो आगदो। ङसे एदो दुहपइ त्ति। वच्छोदि
ओ। मेरे भिइ इत्यत्र॥१२॥ इदुतोः शसो णो। इदुदंतयोः शसो णो भवति। अग्गिणो पेच्छइ। वाउणो पच्छ॥१३॥ ङसो वा। इदुतोरि
दुदंतयोः ङसो वा णो भवति। अग्गिणो। अग्गिस्स। वाउणो। वाउस्स॥१४॥ जसश्च पूर्त्वे वा। इदुदंतयोर्जस ओकारादेशो भवति
इदुतोश्च पूर्त्वं वा। चकारान्नणो च। अग्गीओ। वाउओ॥ अग्गिणो। वाउणो॥१५॥ यणा। इदुदंतयोष्टाविभक्तेर्णा इत्ययमादेशो भ
वति। अग्गिणा। वाउणा॥१६॥ सुभिः सुप्सु दीर्घः। सुभिस्सुप्सु इत्येतेषु दीर्घो भवति। सु अग्गी। वाऊ। भिस्। अग्गीहिं। वाऊहिं। सुप्।
अग्गीसु। वाऊसु॥१७॥ स्त्रियां शस उदोतौ। स्त्रियां वर्त्तमानस्य शस उत ओत् इत्येतावादेशौ भवतः। मालाउ। मालाओ। ण
ईउ। णईओ। वहूउ। वहूओ॥१८॥ ङसो वा। ङसः स्त्रियां उ ओ इत्येतौ वादेशौ भवतः। पक्षे। अदंतवत्। मालाउ। मालाओ।
मालस्स। मालाइ॥१९॥ अमि ह्रस्वः। अमि परतः स्त्रियां ह्रस्वो भवति। मालं। णइं। वहुं। पेच्छ॥२०॥ टाङसङीनामिदेदातः।
टाङसिङीत्येतेषां स्त्रियां इत् एत् अत् आत् इत्येते आदेशा भवंति। टा। णईइ। णईए। णईअ। णईआ। कअं। ङस्। णईइ। णईए।
णईअ। णईआ॥ घरं। ङि। णईइ। णईए। णईअ। णईआ। ठिअं। एवं वहूइ। वहूए। वहूअ। वहूआ॥२१॥ नातो दातौ। आ

॥राम
॥१२॥

आकारांतस्य स्त्रिलिंगस्यानंतरं टाङसङीनां अत् आत् इत्येताव् आदेशौ भवतः। पूर्वेणाप्राप्तोपि विनिषिध्यते। मालइ। माल
ए। कआ। धणा। ठिआ। ॥२२॥ आदितो बहुलं॥ स्त्रियामाकारांतादातः स्थाने आत् इत् इत्येतौ बहुलं प्रयोक्तव्यौ। सहमा
णा। सहमाणो। वेवमाणा। वेवमाणी। हेलइ। हलइ। सुप्पणहा। सुप्पणही॥२३॥ नपुंसके॥ अथ मकवचे नपुंसके दीर्घत्वं
न भवति। वहं। दहिं। महुं। धणं। हविं॥२४॥ इज्जस्शसोर्दीर्घश्च॥ नपुंसके वर्त्तमाने योर्जस्शसोः स्थाने इत् आदेशो भवति। दीर्घश्च
वणाइं। दहीइं। महूइं। खधेत्यादिमाहत्वे॥२५॥ नामंत्रणे सावात्वदीर्घबिंदवः॥ आमंत्रणे गम्यमाने सौ परतः ओत्व दीर्घ
बिंदवो न भवंति। अनेनोत्सावितिउत्वे प्राप्ते। सुभिसुप्सु दीर्घ इति दीर्घः। सोर्बिंदुर्नपुंसके॥ हे वण। हे दहि। हे मह॥२६॥ स्त्रि
यामात एत्॥ स्त्रियामामंत्रणे आतःस्थाने एत्वं भवति। सौ परतः। हे माले। हे साले। अंत्यस्य हलः इति सोर्लोपः। ईदूतोर्ह्रस्वः॥ आ
मंत्रणे ईदूतोर्ह्रस्वो भवति। हेणइ। हे बहु॥२८॥ सोर्बिंदुर्नपुंसके॥ नपुंसके वर्त्तमानस्य सोर्बिंदुर्भवति। वणं। दहिं। महुं॥२९॥
ऋत आरः सुपि॥ ऋकारांतस्य सुपि भक्तौ परतः आर इत्यादेशो भवति। भत्तारो सो हइ। भत्तारं पेछसु। भत्तारेण॥२९॥ मातु
रत्॥ मातृसंबंधिनः ऋकारस्याकारो भवति। माआ सो हइ। माअं पेछसु। माआइ कअं। माआरा॥३०॥ उर्जस्शसटाङस्सु पु

॥प्राकृतम॰॥
॥२३॥

सुवा॥ जस्ससस् टा ङ॰ सुसु सुपसु परतः ऋकारस्य स्थाने उकारादेशो भवति वा॥ आरांन त्वं वास्यादित्यर्थः॥ जस् कर्त्तू ओ
पेच्छंति॥ कत्तारयि च्छंति। कत्तुणो पेच्छंति। शस्॥ भत्तुणो। टा॥ भत्तुणा। ङ॰ स्॥ भत्तुणो॥ भत्तुस्स आरादि पूर्ववत्॥ ३१॥ पितृ
भ्रातृ जामातृ णामरः॥ पित्रादीनां सुपि परत ऋत अरो भवति। आरापवादः॥ पिअरं पेच्छसु। पिअरेण॥ भाअरं। भाअरेण॥ जा
माअरं। जामाअरेण॥ ३२॥ आ च सौ॥ पित्रादीनामाकारो भवति॥ सौ परतः। चकाराद् अरश्च। पिआ। पिअरो॥ भाआ॥ भा
अरो। जामाआ। जामाअरो॥ ३३॥ राज्ञश्च। राजन्शब्दस्य आ इत्ययमादेशो भवति। सौ परे। राआ॥ ३४॥ आमंत्रणे वा
बिंदुः॥ आमंत्रणे राज्ञो वा बिंदुः स्यात्। सौ परतः। हे राअं॥ ३५॥ जस्शस्ङ॰सांणो॥ राज्ञ उत्तरेषां जस्शस्ङ॰सां इत्येषां णो
इत्यादेशः स्यात्॥ राआणो पेच्छंति। राआणो पेच्छ। राइणो धणं॥ ३५॥ शस्ए तु। राज्ञः परस्य शस्ए इत्यादेशः स्यात्॥
राए पेच्छ। राआणो पेच्छ॥ ३६॥ आमो णं॥ राज्ञ उत्तरस्यामो णं इत्यादेशो भवति॥ राआणं॥ ३७॥ टा णा॥ राज्ञः परष्टा णा स्यात्
राइणा॥ ३८॥ जस्सश्च द्वित्वं वा लोपश्च॥ राज्ञ उत्तरस्य ङसादेशस्य टादेशस्य च वा विकल्पेन द्वित्वं भवति॥ अंत्यलोपश्च॥
राइणो। रण्णो। राइणा॥ ३९॥ इद् द्वित्वे॥ राज्ञ इत्वं स्यात्॥ वेति निवृत्तं॥ ङसादेशस्य टादेशस्य च॥ राइणो। राइणा। द्वित्वेन भवति

॥रा

आणोङसि ॥ णोणामोः परयो राज्ञो जकारस्य आकारस्य आन् ॥ राआणो पेच्छंति ॥ राआणं धणं ॥ अङसीति किं ॥ राइणो धणो ॥ ४१ ॥
आत्मनोप्पाणो वा ॥ आत्मन् शब्दस्य अप्पाणो इत्ययमादेशो भवति वा ॥ अप्पाणो ॥ अप्पा ॥ ४२ ॥ इत्वद्वित्ववर्जं राजवद
नादेशे ॥ आत्मनो अनादेशे राजवत् कार्यं स्यात् इत्वद्वित्वे वर्जयित्वा ॥ अप्पा ॥ अप्पाणो धणं ॥ ४३ ॥ ब्रह्माद्या आत्मवत् ॥
ब्रह्माद्याः शब्दाः लक्ष्यानुसारेण आत्मवत् भवंति ॥ ब्रह्मा ॥ ब्रह्माणो ॥ जुवा ॥ युवाणो ॥ अद्धा ॥ अद्धाणो ॥ एवमादयो लक्ष्या
नुसारेणानुगंतव्याः ॥ ॥ इति वररुचिकृते प्राकृतप्रकाशे मनोरमायां लिंगानां विभक्त्यादेशो पंचमः परिच्छेदः
समाप्तः ॥ ॥ सर्वादेर्जस एत्वं ॥ सर्वादेरकारस्य जस एवं भवति ॥ सव्वे ॥ जे ॥ ते ॥ के ॥ केदर ॥ १ ॥ ङेः स्सिंम्मित्थाः ॥ ङेः सप्तम्येकव
चनस्य सर्वादिपरस्थितस्य स्थाने स्सिंम्मित्थ इत्येते आदेशा भवंति ॥ सव्वस्सिं ॥ सव्वम्मि ॥ सव्वत्थ ॥ इअरस्सिं ॥ इअरम्मि ॥ इअरत्थ ॥ २ ॥
इदमेतत्किंयत्तद्भ्यष्टा इणा वा ॥ इदम् ॥ एतत् ॥ किम् ॥ एतत् ॥ तद् इत्येतेभ्यः परस्य टा इत्यस्य इणादेशो भवति वा ॥ इमिणा ॥ एदिणा ॥ कइणा ॥
जइणा ॥ तइणा ॥ पक्षे इमेण ॥ एदेण ॥ केण ॥ जेण ॥ तेण ॥ ३ ॥ आमएसिं ॥ इदमादिभ्यः उत्तरस्य आम एसिं इत्ययमादेशो भवति ॥ वा ॥
इमेसिं ॥ इमाण ॥ एदेसिं ॥ एदाण ॥ केसिं ॥ काण ॥ जेसिं ॥ जाण ॥ तेसिं ॥ ताण ॥ ४ ॥ किंयत्तद्भ्यो ङसः आसः ॥ किम् यत् तत् एभ्य उत्तरस्य

ङः सः आस इत्ययमादेशो भवति॥ वा॥ कास॥ कस्स॥ जास॥ जस्स॥ तास॥ तस्स॥ ५॥ इद्भ्यः स्सासे॥ इकारान्तेभ्यः किमादिभ्य उत्तर
स्य ङः सः स्सा से इत्येतावादेशौ वा भवतः॥ किस्सा॥ किसे॥ कीआ॥ कीए॥ कीइ॥ जिस्सा॥ जीसे॥ जीआ॥ जीए॥ जीअ॥ जीइ॥ तिस्सा॥
तीसे॥ तीआ॥ तीए॥ तीअ॥ तीइ॥ ६॥ ङेर्हिं॥ किमादिभ्य उत्तरस्य ङेः हिं इत्ययमादेशो भवति॥ वा॥ कहिं॥ कस्सिं॥ कम्मि॥ कत्थ॥ जहिं॥
जस्सिं॥ तस्सिं॥ तम्मि॥ तत्थ॥ ७॥ आहे इआ काले॥ किंयत्तद्भ्यो ङेः काले आहे इआ इत्यादेशौ भवतः॥ वा॥ काहे॥ जाहे॥ ताहे॥
कइआ॥ जइआ॥ तइआ॥ कहिं इत्यादयोपि॥ ८॥ तो दो ङसेः॥ किमपतद्भ्यो ङसेः तो दो इत्येतावादेशौ भवतः॥ कत्तो॥ कदो॥
जत्तो॥ जदो॥ तत्तो॥ तदो॥ ९॥ तद ओ॥ तद उत्तरस्य ङसे ओकारादेशो भवति॥ तत्तो॥ तदो॥ १०॥ ङसः सासे वेति वर्त्तते॥ तदो
ङसः सा स ह से इत्ययमादेशो भवति॥ पक्षे यथाप्राप्तं॥ तेतास॥ तस्स॥ ११॥ आमा स्सिं॥ तद आमा सह सिं इत्ययमादेशो भवति॥
ताण॥ १२॥ किमः कः॥ किंशब्दस्य सुपि परतः क इत्ययमादेशो भवति॥ को॥ के॥ कोण॥ कहिं॥ १३॥ इदम इमः॥ सुपि पर
त इदमः इम इत्ययमादेशो भवति॥ इमो॥ इमं॥ इमे॥ इमेण॥ इमेहिं॥ १४॥ स्सस्सिंमोर ह्लो॥ स्सस्सिंमोः परत इदम म ह्लादेशो भ
वति॥ वा॥ अस्स॥ इमस्स॥ अस्सिं॥ इमस्सिं॥ १५॥ ङेर्दैन हः॥ इदमो दकारेण सह ङेः स्थाने हकारादेशो भवति॥ इह॥ अस्सिं॥ इम
स्सिं॥ इमम्मि॥ १६॥ न त्थः॥ इदमः परस्य ङेः त्थ इत्ययमादेशो भवति॥ ङेः स्सिमित्था इति प्राप्तः प्रतिषिध्यते॥ इह॥ इमस्सिं॥ ॥राम॥

इमम्मि ॥१७॥ नपुंसके स्वमोरिदमिणमिणमो ॥ नपुंसकलिंगे इदमः स्वमोः परतः सविभक्तिकस्य इदं इणं इणमो इत्येते
त्रय आदेशा भवंति। इदं। इणं। इणमो। धणं ॥ एतदः सावोत्तं वा। एतच्छब्दस्य सौ परतः ओत्तं वा भवति। नित्ये प्राप्ते विकल्प्यते ॥ ए
सो। एसो ॥१८॥ त्तो ङसेः ॥ एतदः परस्य ङसेः त्तो इत्ययमादेशो भवति। एत्तो। एदात्तो। एदादु। एदाहि ॥१९॥ त्तोत्थयोस्तोलोपः
एतदः नकारस्य त्तोत्थयोः परतो लोपो भवति। एत्तो। एत्थ ॥२१॥ तदेतदो। सावनपुंसके ॥ तच्छब्दस्य एतच्छब्दस्य च स्तका
रस्तस्य सकारादेशो भवति ॥ अनपुंसके सौ परतः। सो पुरिसो। सा महिला। एस। एसो। एसा। अनपुंसक इति किं ॥ तं धणं। एधणं
॥२२॥ अदसो दो मुः ॥ अदसो दकारस्य सुपि परतो [illegible] मु इत्येवमादेशो भवति। अमू पुरिसो। अमू महिला।
अमू अमहिला। ओ। अमुं वणं। अमूइं वणाइं ॥२३॥ ह अ सौ ॥ अदसो दकारस्य सौ परतो हकारादेशो भवति ॥ अह पुरिसो
अह महिला। अह वणं। हादेशोयमोत्वोत्वबिंदून् त्रिष्वपि लिंगेषु परत्वाद्बाधते ॥२४॥ पदस्य ॥ अधिकारोयं ॥ आ शास्त्र
विधानादधिन ऊर्ध्वमनुक्रमिष्यामः पदस्य तद्भवतीत्येतद्वेदितव्यं। नचैतत्रैवोदाहरिष्यामः ॥२५॥ युष्मदः त्तं तुमं। सावि
त्येव। युष्मदः पदस्य सौ परतः त्तं तुमं इत्येतावादेशौ भवतः। तं आगदो। तुमं आगदो ॥२६॥ त्तं वामि। युष्मदः पदस्य अमि तं वा

देशो भवति । तुमं च । तं पेछामि । तुमं पेछामि ॥ २७ ॥ तुम्भे तुम्हे जसि । युष्मदः परस्य जसि परतः तुम्भे तुम्हे आगदा वा ।
२८ ॥ वो च शसि । शसि युष्मदः परस्य वो इत्यादेशो भवति । चकारात्तुम्भे तुज्जे च । वो पेछामि । तुम्हे पेछामि । तुज्झे पेछामि ॥ २९
टाङ्यो स्तु इ तेरा तुमर तुमे ॥ युष्मदुत्तरयोष्टाङि इत्येतयोस्तु इ त ए तु मे इत्ये इत्येते आदेशा भवंति । टा । तइ । तए । तुमए । तुमे ।
के अं ङि । तइ । तए तुमए । तुमे । ठिअं ॥ ३० ॥ ङसि तुमो तुह तुभ्रु तुम्ह तुम्हा ॥ युष्मदंतः पदस्य ङसि तुमो तुह तुब्भ तुम्ह तुम्हा
इत्येते आदेशा भवंति ॥ तुमो पदं । तुह पदं । तुब्भ पदं । तुम्ह पदं । तुम्हा पदं ॥ ३१ ॥ आङि च ते दे ॥ आङि तृतीयैकवचने
ङसि च परतः युष्मदः पदस्य ते दे इत्येतावादेशौ भवतः । ते कअं दे कअं । ते धणं । दे धणं ॥ ३२ ॥ तुमाइ चा आङि युष्मदः
पदस्य तुमाइ इत्ययमादेशो भवति । तुमाइ । कअं ॥ ३३ ॥ तुज्झेहिं । तुम्हेहिं । तुम्भेहिं भिसि । भिसि परतो युष्मद पदस्य तुब्भेहिं
तुम्हेहिं इत्येते आदेशा भवंति ॥ तुब्भेहिं । तुम्हेहिं । कअं । ङसौ सभो सइ भो ॥ तुमाहो तुमादु तुमाहि । ङसौ परतः युष्मदः पदस्य
तत्तो । तइत्तो । तुमादो । तुमादु । तुमाहि । इत्येते आदेशा भवंति । तत्तो आगदो । तइत्तो आगदो । तुमादो । तुमादु आगदो । तुमाहि
आगदो ॥ तुम्हाहिंतो तुम्हासुंतो भ्यसि । युष्मदः पदस्य पंचमीबहुवचने भ्यसि । तुम्हाहिंतो । तुम्हासुंतो । इत्येतावादेशौ भवतः ।

नर

तुम्हाहिंतो आगदो। तुम्हासुंतो आगदो॥ ३६॥ वो मे तुम्हाणं तुम्हाण मामि॥ आमि परतो युष्मदः पदस्य वो मे तुम्हाणं तुम्हा
णं इत्येते आदेशा भवंति। वो धणं। मे धणं। तुम्हाणं धणं। तुम्हाण धणं॥ ३७॥ ङौ तुमम्मि॥ युष्मदो ङौ परतः तुमम्मि इत्यादेशो
भवति। तुमम्मि ठिअं॥ ३८॥ तुम्हेसु तुम्हसु सुपि। युष्मदः पदस्य सप्तमीबहुत्वे तुम्हेसु तुम्हसु इत्येतावादेशौ भवतः। तुम्हसु ठिअं
तुम्हेसु ठिअं॥ ३९॥ अस्मदो हं अहं अहअं सौ। अस्मदः पदस्य सौ परतः हं अहं अहअं इत्येते आदेशा भवंति। हं। अहं। अहअं।
॥ ४०॥ अहमिरमिव। अमी परतो अस्मदः पदस्य अहमिअ इत्ययमादेशो भवति। सो च। अहमि। पेछ। अहम्मि करेमि॥ ४१॥
मं ममं। अपीति अनुवर्त्तते। अस्मद पदस्य अमी परतो मं ममं इत्येतावादेशौ भवतः। मं पेछ। मम पेछ॥ ४२॥ अम्हे जस्सासोः। अ
स्मदो जस्सासोः परयोः अम्हे इत्यादेशो भवति। अम्हे आगदा। अम्हे पेछ॥ ४३॥ णो शसि॥ शसि परतोऽस्मदः पदस्य णो इत्यादेशो
भवति। णो पेछ॥ ४४॥ आङि मममाइ॥ आङि परतोऽस्मदः पदस्य मे ममाइ इत्येतावादेशौ भवतः। मे कअं। ममाइ कअं॥ ४५॥
ङौ च मयि मयाइ। आङि इत्यनुवर्त्तते। अस्मदः पदस्य ङौ मइ मए इत्येतावादेशौ स्तः। मइ ठिअं। मए ठिअं। चकारात् तृतीयायामपि
मइ कअं। मए कअं॥ ४६॥ अम्हेहिं भिसि। अस्मदः पदस्य भिसि परतः अम्हेहिं इत्यादेशो भवति। अम्हेहिं कअं॥ ४७॥ मत्तो मइत्तो

मदो मम माढु मम महि ङसौ॥ मज्झो मइ ज्झो मम मदो मम मादु मम माहि इत्येते आदेशाः अस्मदः ङसा भवन्ति॥ मज्झो॥ मइ ज्झो॥ मम मदो॥ मम मादु॥
मम माहि॥ आगदो॥ ४८॥ अम्हाहिंतो अम्हसुन्तो भ्यसि॥ भ्यसि परतो ऽस्मदो अम्हाहिंतो अम्हासुन्तो इत्येतावादेशौ भवतः॥ अम्हाहिंतो
अम्हासुन्तो आगदो॥ ४९॥ मे मम मम मह मा इत्यङ्सि॥ ङसि परतो ऽस्मदो मे मम मम मह मा इत्येते आदेशा भवन्ति॥ मे धणं॥ मह धणं॥ म
ज्झे धणं॥ ५०॥ म ङसाणो अम्ह अम्हे अम्हाण अम्हे आमि॥ आमि परतो ऽस्मदो म ङसाणो अम्ह अम्हाण अम्ह इत्येते आदेशा भवन्ति॥
मज्झो धणं॥ णो धणं॥ अम्ह धणं॥ अम्हाण धणं॥ अम्हे धणं॥ ५१॥ मम म्मि ङौ॥ अस्मदो ङौ परतो मम म्मीत्ययमादेशो भवति॥
मम म्मि ठिअं॥ ५२॥ अम्हेसु सुपि॥ अस्मदः सुपि परतो अम्हेसुं इत्यादेशो भवति॥ अम्हेसुं ठिअं॥ ५३॥ द्वे दो॥ पदस्येति निवृत्तं स
पिरपिवर्त्तते॥ सुपि परतो द्विशब्दस्य दो इत्यादेशो भवति॥ दोहि॥ कअं॥ दोसु ठिअं॥ ५४॥ त्रेस्ती॥ त्रिशब्दस्य सुपरतो त्ती आदेशो भ
वति॥ तीहिं॥ कअं॥ तीसु ठिअं॥ निस्सि जश्शसोः॥ त्रिशब्दस्य जः श्शस्भ्यां सह निस्सि इत्यादेशो भवति॥ निस्सि पुरुसा आगदा॥
निस्सि पुरीसे पेक्ख॥ ५५॥ द्वेर्दुवे दोण्णि वा॥ जश्शसोरित्यनुवर्त्तते॥ द्विशब्दस्य जश्शसोर्भ्यां सह दुवे दोण्णि इत्येतावादेशौ
वा भवतः॥ दुवे पुरिसा॥ दोण्णि पुरिसा॥ कुणन्ति॥ दुवे पुरिसे पेक्ख॥ दोण्णि पुरिसे पेक्ख॥ ५६॥ चतुरश्चत्तारो चत्तारि॥ चतुरशब्दस्य

॥राम॥
॥२६॥

जश्शस्भ्यांसह चत्तारो चत्तारिये तोवादेशौ भवतः। चत्तारो पुरिसांगणेंतिन्ति। चत्तारि पुरिसांगणांनिन्ति। चत्तारो पुरिसा पेछ। चत्तारि पुरुसा पेछ॥ ५८॥ एवामामो ह॥ एषां। एषां। द्वित्रिचतुर इत्यादीनां मामः स्थाने ण्हं इत्ययमादेशो भवति॥ दोण्ह धणं। तिण्ह धणं। चदुण्ह धणं॥ ५९॥ शेषोदन्तवत्॥ शेषः सुब्विधिरदन्तवद्भवति॥ अकारान्ता ङिसोर्हि इत्ययमादेशो उकारे इकारे वा कारान्तादपि भवति। अग्गीहिं वाऊहिं। एवं मालाहिं। णईहिं। बहूहिं॥ अग्गिस्स। वाउस्स। अग्गिदो। वाऊदो॥ अग्गीदु। वाऊदुः। एवं दोहिं। तिहिं। चउहिं॥ ६०॥ नङिङस्योरेदात्तौ॥ इकारान्तानां ङिङस्योरदन्तवदेकारादेशो न भवति॥ अग्गिस्मि। वाउस्मि। अग्गी। अग्गीदो। वाउदो। अग्गीदु। वाउदु। अग्गीहिं। वाउहिं॥ ६१॥ एभ्यसि नेत्यनुवर्तते। भ्यसिपरत ए अदन्तवद्भवति॥ अग्गीहिंतो। वाउहिंतो॥ ६२॥ द्विवचनस्य बहुवचनं॥ सर्वासां विभक्तीनां लिङ्गानां च द्विवचनस्य बहुवचनं प्रयोक्तव्यं॥ वृक्षौ वच्छा। वृक्षाभ्यां। वच्छेहिं। वृक्षाभ्यां। वच्छाहिंतो। वृक्षयोः। वच्छाणं। वृक्षयोः। वृच्छेसु। निङो यथा। तिङन्तः तृवंति॥ ६३॥ चतुर्थ्याः षष्ठी॥ चतुर्थीविभक्तेः स्थाने षष्ठीविभक्तिर्भवति। ब्राह्मणस्स देहि। ब्राह्मणाण देहि॥ ६४॥ इति वररुचिविरचिते प्राकृतप्रकाशे सर्वनामपरिच्छेदः षष्ठः समाप्तः॥ तेतिपोरिदेतौ॥ तेतिपोः प्रत्येकयोरेकैकस्य स्थाने इत् एत् इत्येतावादेशौ भवतः। पढइ। पढए। सहइ। सहए। प्यासः। सियोः सिसे॥

प्रा॰रू॰नम॰
८

प्यासस्सिप् इत्येतयोः स्सिस इत्येतावादेशौ भवतः॥ पढस्सि पढसे। सहस्सि सहसे॥ २॥ इट्‌मिपोर्म्मिः। इट्‌मिपोः स्थाने म्मिर्भवति।
हसामि। पढामि। सहामि॥ ३॥ न्तिहेत्थामोमुमा बहुषु॥ बहुषु वर्त्तमानानां स्थाने न्ति ह इत्था मो मु म इत्येते आदेशा भवंति॥ प्रथमपुरु
षस्य। हसंति। पढंति। हसंति। मध्यमस्य। पढह। पढित्था॥ उत्तमस्य। तु यथा। पढामो। पढमु। पढम॥ ४॥ अत एसे॥ नित्यार्थवचनं
यावता विशेषणं। तेनि योसिप् थासोः एसे आदेशौ। अत एव अकारांतादेव धातोः परौ भवतः। नान्यस्मात्। रमए। पढए। रमसे
पढसे। अत इति किं। होइ॥ ५॥ असेर्लोपः। असेर्धातोः परतोस्थास्सिपोर्लोपो भवति। सुल्लोसि। पुरिसोसि॥ ६॥ मिमोमानाम
धोहश्च। मिमोमानामस्तेः परेषां मधो हकारप्रयोक्तव्यः॥ अस्तेश्च लोपः॥ ओम्हि॥ ओम्हो॥ ओम्ह॥ ७॥ एकई अई ज्जो।
एकस्थाने ईअ इज्जो देशौ भवतः। पढीअइ। पढिज्जइ। सहीअइ। सहिज्जइ॥ ८॥ द्वित्वं धातोरक्षर द्वित्वे सति। एकई अई ज्जइ
इत्येतावादेशौ भवतः। हस्सइ। गम्मइ। गमादीनां विकल्पेन द्वित्वं॥ ९॥ न्तमाणौ शतृशानचौः। शतृशानच इत्येतयोरेकैकस्य
न्तमाण इत्येतावादेशौ भवतः। पढन्तो। पढमाणो। हसन्तो। हसमाणो॥ १०॥ ईन्त स्त्रियां॥ स्त्रियां वर्त्तमानयोः शतृशानचोरिकारादेशो
भवति॥ न्तमाणौ च। हसई। हसंती। हसमाणा। वेवई। वेवंती। वेवमाणा॥ ११॥ धातोर्भविष्यति हिः॥ भविष्यति काले धातोः परस्मि

राम
८

शब्दः प्रयोक्तव्यः। होहिइ। हसिहिइ। होहिंति। हसिहिंति। होहिसि। होहिहा। होहिंत्था॥ १२॥ उत्तमे स्सा हा च॥ भविष्यत्युत्तमे
स्सा हा इत्येतौ प्रयोक्तव्यौ। चकारात् हिश्च॥ होस्सामि। होहामि। होहिमि। होस्सामो। होस्सामु। होस्साम॥ इत्येवं। होहामो। होहा
मु। होहाम। होहिमो। होहिमु। होहिम॥ १३॥ मिना स्सं वा॥ भविष्यत्युत्तमे मिना सह धातोः परः स्सं शब्दः प्रयोक्तव्यः॥ होस्सं। होस्सामि॥
होहामि॥ होहिमि। हसिस्सं। हसिस्सामि। हसिहामि। हसिहिमि॥ १४॥ मोमुमेषु हिस्सा हित्था॥ भविष्यति बहुवचनादेशस्य मोमुमैः
सह हिस्सा हित्था च इत्येतावादेशौ भवतः। होहिस्सा। होहित्था। होहिमो। होस्सामो। होहामो। हसिहिस्सा। हसिहित्था। हसिहिमो।
हसिस्सामो। हसिस्सामो। हसिहामो। एवं मुमयोरपि॥ १५॥ कृदो श्रुवचिगमि रुदि दृशां रूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रुच्छं दच्छं॥
भविष्यत्युत्तमे एकस्मिन् वचने भूतानां काहमित्यादीनि निपात्यंते। करिष्यामि। काहं। दास्यामि। दाहं। श्रोष्यामि। सोच्छं। वक्ष्यामि। वोच्छं।
गमिष्यामि। गच्छं। रुदिष्यामि। रुच्छं। द्रक्ष्यामि। दच्छं। वत्स्यामि। वोच्छं॥ १६॥ श्र्वादीनां त्रिषु अनुस्वारवर्जं हिलोपश्च वा॥ श्रु इत्येवमादीनां
त्रिष्वपि पुरुषेषु परतो भविष्यति काले एते आदेशा भवंति। अनुस्वारं विहाय। हिलोपश्च वा। सोच्छइ। सोच्छिहिइ। सोच्छिंति। सोच्छिहिंति
सोच्छिसि। सोच्छिहिसि। सोच्छिहिह। सोच्छिहा। सोच्छिहित्था। सोच्छिमि ति। सोस्सोच्छिहिमि। एवं वोच्छादेरपि॥ १७॥ उ सु मु विध्यादिष्वेकस्मिन्॥

॥प्रा०त०म०॥ ॥१८॥

विध्यादिष्वेकवचनेषूत्पन्नस्य प्रत्ययस्य यथासंख्यमेते आदेशा भवंति। हसउ। हससु। हसमु। वोछउ। वोछसु। वोछमु॥१८॥ न्तु ह मो ब
हुषु। विध्यादिषु बहुषूत्पन्नस्य प्रत्ययस्य यथासंख्यं न्तु ह मो एते आदेशाः स्युः। हसंतु। हसह। हसामो॥१९॥ वर्त्तमानभविष्यदनद्यत
नयोर्ज्ज ज्जा वा॥ वर्त्तमाने भविष्यदनद्यतने काले विध्यादिषु चोत्पन्नस्य प्रत्ययस्य ज्ज ज्जा इत्येतावादेशौ वा स्तः। विकल्पेन यथाप्राप्तं च
पक्षे वर्त्तमाने तावत्॥ होज्ज। होज्जा। हसेज्ज। हसेज्जा। होइ। होसइ। भविष्यदनद्यतने। होज्ज। होज्जा। होहिइ॥२०॥ विध्यादिषु धा
तुप्रत्यययोर्मध्ये॥ विध्यादिषु धातुप्रत्यययोर्मध्ये ज्ज ज्जा इत्येतावादेशौ भवतः। वर्त्तमाने होज्जइ। होज्जाइ। होज्ज। होइ। भविष्यदन
द्यतने। होज्जइ। होज्जाइ। होहिइ। विध्यादिषु। होज्जउ। होज्जाउ। होउ॥२१॥ नानेकाचः॥ अनेकाचो धातोर्वर्त्तमानभविष्यदनद्यतने
विध्यादिषु चोत्पन्ने प्रत्यये परे धातुप्रत्यययोर्मध्ये ज्ज ज्जो न स्तः। हसइ। तुवरइ। हसिज्ज। हसेज्जा। तुवरिज्ज। तुवरेज्जा॥ एवमन्ये
ष्वपि उदाहर्त्तव्या॥२२॥ ईअ भूते॥ भूते काले धातोः प्रत्ययस्य ईअ इत्ययमादेशो भवति। भविअं। हसिअं॥२३॥ एकाचो हीअ॥ भूते का
ले एकाचो धातोः प्रत्ययस्य हीअ इत्ययमादेशो भवति। होहीअ॥२४॥ आसि॥ असो भूतेकाले एकस्मिन्नर्थे आसि निपात्यं
ते। आसि राआ। आसि वह॥२५॥ णिच्च पूदादेरन आवा। णिच्प्रत्ययस्य एकारादेशो भवति। आदेरकारस्य चात्वं भवति। कारेइ।

॥राम॥ ॥१८॥

हासेइ। पाढइ॥ २६॥ आवे णिच्च॥ णिच् आवे इत्ययमादेशो भवति। चकारात्पूर्वोक्तं च। करावेइ। हसावेइ। पढावेइ॥ २७॥ आवि क्तः
कर्मभावेषु वा॥ णिचि आवि आदेशो भवति वा। क्त प्रत्यये परे तः। भावकर्मणोः। आकराविअं। हसाविअं। पढाविअं। कारिअं। हासिअं। पा
ढिअं। भावकर्मणोः। आकराविज्जइ। हसाविज्जइ। पढाविज्जइ। कारिज्जइ। हासिज्जइ। पाढिज्जइ॥ २८॥ अत आ मिपि वा॥ अकारान्त
धातोः मिपि परत आकारादेशो भवति। वा। हसमि। हसामि॥ २९॥ इच्च बहुषु॥ अत इकारादेशो भवति। आच। हसिमो। हसामो। हसिमु
हसामु॥ ३०॥ क्ते॥ क्ते प्रत्यये परतो अत इर्भवति। हसिअं। पढिअं॥ ३१॥ एच्च क्त्वातुमुन्तव्यभविष्यत्सु॥ क्त्वा तुमुन् तव्य इत्येतेषु भविष्य
त्काले च अत एत्वं भवति। चकारादित्त्वं। हसेतुण। हसिऊण। हसेऊं। हसिऊं। हसिअव्वं। हसेअव्वं। हसेहिइ। हसिहिइ॥ ३२॥ लादेशो वा।
लकारादेशे परत अत एत्वं भवति। हसेइ। हसइ। पढेइ। पढइ। हसेन्ति। हसन्ति। हसेउ। हसउ॥ ३३॥ ॥ इति श्रीवररुचिविरचिते प्रा
कृतप्रकाशे सप्तमः परिच्छेदः॥ ७॥ ॥ भुवो होहुवौ॥ भू सत्तायामित्यस्य धातोः हो हुव इत्येतावादेशौ भवतः॥ होइ। हुवइ। होन्ति।
हुवन्ति। सि। क्ते हूः। भुवः क्त प्रत्यये परतो हू इत्ययमादेशो भवति। हूअं॥ २॥ प्रादेर्भवः। प्रादेरुत्तरस्य भुवो भव इत्ययमादेशो भवति। पभवइ।
उब्भवइ। संभवइ। पजिभवइ॥ ३॥ त्वरस्तुवरः। त्वरा संभ्रमे। अस्य धातोः तुवर इत्ययमादेशो भवति। तुवरइ॥ ४॥ क्ते तुरः॥ क्त प्रत्यये तुर

इत्ययमादेशो भवति॥ तुरिअं॥७॥ घूर्णो घोलः॥ घूर्ण भ्रमणे। अस्य धातोर्घोल इत्ययमादेशो भवति॥ घोलइ॥८॥ नुदे ल्लोगः॥ णुद प्रे
रणे। अस्य धातोर्ल्लोगः इत्ययमादेशो भवति॥ ल्लोगइ। पल्लोगइ॥९॥ दूङो दूमः। दूङ् परितापे। अस्य धातोर्दूमो भवति॥ दूमइ॥१०॥ पटे
फलः॥ पट गतौ॥ अस्य धातोः फलो भवति॥ फलिअं। हिअअं॥११॥ पदेः पालः॥ पद गतौ इत्यस्य पाल इत्ययमादेशो भवति। पालइ॥
१२ इदं सूत्रं नास्ति॥ वृषकृषमृषहृषां मृते अरिः। वृषादेरनामृतः स्थाने अरिरित्ययमादेशो भवति॥ वृषवरिसइ। कृषकरिसइ। मृषम
रिसइ। हृषहरिसइ॥११॥ ऋतोरः॥ ऋकारान्तस्य धातोः ऋत स्थाने अर भवति॥ मृ मरइ। सृ सरइ। वृ वरइ॥१२॥ कृञः कुणो वा॥ डुकृञ्
करणे। अस्य धातोः प्रयोगे कुणो भवति वा॥ कुणइ। करइ॥१३॥ कृञः कुणो वा। जृम्भो जम्भाअं। जृभि जृम्भि गात्रविनामे। अस्य धातोर्जंभा
अ इत्ययमादेशो भवति॥ जंभाअइ॥१४॥ ग्रहेर्गेराहः॥ ग्रह उपादाने॥ अस्य धातोर्गेराह इत्ययमादेशो भवति। गेराहइ॥१५॥ घेत्क्त्वा तुमन्
तव्येषु॥ ग्रहेर्घे इत्ययमादेशो भवति। क्त्वा तुमन् तव्येषु परतः। घेत्तूण। घेत्तुं। घेत्तव्वं॥१६॥ कृञः का भूते भविष्यतो श्च। भूते भविष्यतो क्त्वा लये
डे अकार इत्ययमादेशो भवति। चकारात् क्त्वा तुमन् तव्येषु परतः। काहिअं। काहिइ। काउण। काउं। काअव्वं॥१७॥ स्मरते र्भरसमरौ। स्मृ चिन्तायां
अस्य धातोर्भरसमर इत्यादेशो भवतः॥ भरइ। सुमरइ॥१८॥ भियो भावीहौ॥ ञिभी भये। अस्य धातोर्भा वीहो भवतः॥ भाइ। वीहइ॥१९॥
म्लैवा वाअः॥ म्लै गात्रविरामे। अस्य धातोर्वा वाअ इत्यादेशो भवतः॥ वाइ। वाअइ॥२०॥ तृपस्थिपः॥ तृप तृप्तौ। अस्य धातोस्थिं

॥राम॥

पोल्लुवति। थिंपइ॥ २१॥ ज्ञो जाणमुणौ॥ जानातेरवबोधने॥ अस्य धातोर्जाणमुणौ भवतः। जाणइ। मुणइ॥ २२॥ जल्पेर्लो मः
जल्पस्य व्यक्तायां वाचि। अस्य धातोर्लकारस्य मकारो भवति॥ जंपइ॥ २३॥ स्थाध्यागानां ठा अ झा अ गा आः॥ ष्ठा गतिनिवृत्तौ।
ध्यै चिंतायां। कै गै शब्दे। एतेषां धातूनां ठा अ झा अ गा अ इत्येते आदेशा भवंति॥ ठाअंति। झाअंति। गाअंति॥ २४॥ ठासागास्त्वभ
विष्यद्वर्त्तमानविध्याद्येकवचनेषु॥ ठाध्यागानां एते आदेशाः स्युः। चकारात्पूर्वोक्ताश्च वर्त्तमानभविष्यद्विध्याद्येकवचनेषु परतः।
ठाहिअ। ठाहिअ। ठाइ। ठाअइ। ठाउ। ठाअउ॥ झाहाहिइ। झाअहिइ। हाइ। झाअइ। झाउ। झाअउ। गाहिअ। गाअहिअ। गाइ।
गाअइ। गाउ। गाअउ॥ २५॥ खादृधाव्योः खाधौ॥ खादृ धाव इत्येतयोः खाधावित्येतावादेशौ भवतः॥ भविष्यद्वर्त्तमानवि
ध्याद्येकवचनेषु परतः। खाइ। खाहिइ। खाउ। धाहिइ। धाइ। धाउ। धाउ॥ २६॥ ग्रसेर्विसः॥ ग्रसु। ग्लसु। अदने॥ अस्य धातोर्विसो
भवति॥ विसइ॥ २७॥ चित्रश्चिणः॥ चित्र वचने। अस्य धातोश्चिणो भवति॥ चिणइ॥ २८॥ क्री त्रो किणः॥ डुक्रीञ् द्रव्यविनिमये॥
अस्य धातोः किणो भवति॥ किणइ॥ वेः स्वे च॥ वेरुत्तरस्य क्रीञः क्के आदेशः किणादेशश्च भवति॥ विक्केइ। विकिणइ॥ ३०॥ उदूध्मा
उद्धुमा॥ ध्मा शब्दाग्निसंयोगयोः॥ अस्य धातोरुत्पूर्वस्य उद्धुमा भवति॥ उद्धुमाइ॥ ३१॥ अदो ओहहः॥ अ... ओदुत्तरस्य दु धाञ् धार
णपोषणयोरस्य धातोर्दहादेशो भवति॥ सद्दहइ। सद्दहिअ। श्रद्धाति॥ ३२॥ अवाद्गाहेर्वाहः॥ गाह विलोडने अस्य धातोरव

॥प्रा.स.न.म.॥
॥२०॥

वादुत्तरस्य वाहादेशो भवति। ओवाहइ॥३३॥ कासेर्वासः॥ अवादित्यनुवर्त्तते। कासृ शब्दकुत्सायां। अस्य धातोरवादुत्तरस्य
वासो भवति। ओवासइ॥३४॥ निरो माङो माणः॥ माङ् माने अस्य धातोर्निरुत्तरस्य माणादेशो भवति। णिम्माणइ॥३५॥ क्षिपो हि
ङ्गः॥ क्षिप प्रेरणे अस्य धातोः हिङ्गो भवति। हिङ्गइ॥३६॥ भिदिछिदोरंतस्य न्दः। भिदिर छिदिर् द्वैधीकरणे अनयोरंतस्य न्दो भवति। भिंदइ। छिंदइ
॥३७॥ क्वथेर्ढः। क्वथ निष्पाके अस्य धातोरंतस्य ढो भवति। कढइ॥३८॥ वेष्टश्च। वेष्ट वेष्टने। अस्यांतस्य ढो भवति। वेढइ। योगविभाग
उत्तरार्थः॥३९॥ उत्समोर्ल्लः। उत्सम्भ्यामुत्तरस्य वेष्टेरंतस्य ल्लो भवति। उव्वेल्लइ। संवेल्लइ॥४०॥ रुदेर्व्वः। रुदिर अस्य धातोरंतस्य
वो भवति। रुवइ॥४१॥ उद्दो विजः। उत्पूर्वस्य विजेरंतस्य वकारो भवति। उव्विवइ॥४२॥ वृधेर्ढः। वृध वर्द्धने अस्य धातोरंतस्य ढो भ
वति। वढइ॥४३॥ हंतेर्म्मः॥ हंतेरंतस्य म्मो भवति। हम्मइ॥४४॥ रुषादीनां दीर्घता॥ रुषादीनां दीर्घता भवति॥ रूसइ। तूसइ। सूसइ॥४५॥
च्चो व्रजनृत्योः। व्रजनृतो अनयोरंतस्य च्चो भवति। वच्चइ। णच्चइ॥४६॥ युधिबुध्योर्ज्झः। युध संप्रहारे। बुध अवगमने अनयो
दो रंतस्य ज्झो भवति। जुज्झइ। बुज्झइ॥४७॥ रुधेर्न्धम्भौ॥ रुधिर अस्य न्धम्भौ भवतः॥ रुंधइ। रुम्भइ॥४८॥ मृदेर्लः। मृद क्षालने अस्य
धातोरंतेर्लो भवति। मलइ॥४९॥ शदिपत्योर्डः॥ शद्लृ शातने॥ पद्लृ पतने अनयोरंतस्य डो भवति॥ सडइ। पडइ॥५०॥ शकादीनां
शक्लृ शक्तौ इत्येवमादीनां द्वित्वं भवति॥ सक्कइ। लग्गइ॥५१॥ स्फुटिचल्योर्वा। स्फुट विकसने चल कंपने अनयोरंतस्य वा द्वित्वं भवति॥

॥राम॥
॥२०॥

नै२

फुट्टइ। फुटइ। चल्लइ। चलइ॥ ५२॥ प्रादेर्मीलः॥ प्रादेरंत्यस्य मीलो द्वित्वं भवति वा॥ पमिल्लइ। पमीलइ॥ ५३॥ भुजादीनां क्त्वातुमु
न्तव्येषु लोपः। भुंजइ इत्येवमादीनां क्त्वातुमुन्तव्येषु परतोंत्यस्य लोपो भवति। भोयणं। भोत्तुं। भोत्तव्वं। विदः। वेत्तूण। वेत्तुं। वेत्तव्वं। रुदे
रोत्तूण। रोत्तुं। रोत्तव्वं॥ ५४॥ श्रुहुजलधुवां णोंत्यह्रस्वः॥ श्रु श्रवणे। हु दाने। लू छेदने। धूञ् कंपने। इत्येतेषां णः प्रयोक्तव्यः। दीर्घ
स्य ह्रस्वो भवति। सुणइ। हुणइ। जिणइ। लुणइ। धुणइ॥ ५५॥ भावकर्मणोर्व्वश्च॥ एषां भावकर्मणोरंत्यो व्वः शः प्रयोक्तव्यः। चकारा
त् णश्च। सुव्वइ। सुणिज्जइ। जिव्वइ। जिणिज्जइ। जिबइ। जणिज्जइ। लुव्वइ। लुणिज्जइ॥ ५६॥ गमादीनां द्वित्वं वा॥ गमादीनां धातूनां द्वि
त्वं वा भवति। गम्मइ। गमिज्जइ। रम्मइ। रमिज्जइ। हस्सइ। हसिज्जइ॥ ५७॥ लिहेर्ल्लिज्झः। लिह आस्वादने॥ अस्य धातोर्ल्लिज्झो भवति॥ भा
वकर्मणोः॥ लिज्झइ॥ ५८॥ हृकृञोर्हीरकीरौ॥ हृञ् हरणे। डुकृञ् करणे। अनयोर्हीरकीरौ भवतः। हीरइ। कीरइ॥ ५९॥ ग्रहेर्घेप्पो
वा। ग्रहेर्धातोर्घेप्पो भवति वा॥ भावकर्मणोरर्थयोः। गाहिज्जइ। गेण्हिज्जइ॥ ६०॥ क्तेन दिण्णादयः। दिण्ण इत्येवमादयः क्तप्रत्ययेन सह
निपात्यन्ते। डु दाञ् दाने॥ दिण्णं। कृ दिट्ठं॥ कणं। त्रसि। हिसंद। दह। दड्डो। रंनि। रत्तं॥ ६१॥ खिदेर्विसूरः॥ खिद दैन्ये। अस्य विसूरो भवति
विसूरइ। विरहेण विसूरइ बाला॥ ६२॥ क्रुधेर्जूरः। क्रुध कोपे। अस्य जूरो भवति। जूरइ॥ ६३॥ चर्व्वश्चंपः। चर्व्व अध्ययने अस्य धातोश्चंपो
भवति॥ चंपइ॥ ६४॥ त्रसेर्वज्जः॥ त्रसी उ द्वेगे। अस्य धातोर्वज्जो भवति॥ वज्जइ। ६५॥ मृजेर्लुभसुपौ॥ मृजू शुद्धौ। अस्य।

॥ध्रास्तम

॥२१॥

राम

धातोर्लुभसुपौ भवतः॥ लुभइ॥ सुपइ॥ ११॥ वुडु खुप्पौ मस्जेः॥ वुडु मस्जो मज्जौ अस्य धातोर्वुडु खुप्पौ भवतः॥ वुडुइ॥ खुप्पइ॥ १७॥ दृशेः
पुलअणिअक्कअवक्खाः॥ दृशिर प्रेक्षणे। अस्य पुलअणिअकअवक्खाः॥ दृशिर प्रेक्षणे॥ अस्य पुलअणिअक्कअवक्खाः भ
ति॥ पुलअइ॥ णिअकइ॥ अवक्खइ॥ १८॥ ज्ञो केस्तरचअतीणाः॥ ज्ञा कृ चान्तौ॥ अस्य धातोस्तरचअतीर इत्येते आदेशा भवंति॥
तरइ॥ चअइ॥ तीरइ॥ ज्ञो धातूनां मर्दना॥ ज्ञेषाणां लुप्तानुवंधानां मर्दना भवन्ति॥ अकारान्ता नता भवन्ति॥ इत्यर्थः॥ भमइ॥ चुंवइ॥ ॥
इति वररुचिविरचिते प्राकृतप्रकाशे धात्वादेशपरिच्छेदः॥ ८मः समाप्तः॥ निपाताः॥ अधिकारोयं॥ वक्ष्यमाणानिपातसंज्ञकाचेदित
व्याः॥ संस्कृतानुसारेण निपातकार्यं कर्त्तव्यं॥ हुं दानपृच्छानिर्द्धारणेषु॥ हुमित्ययं शब्दो दानपृच्छानिर्द्धारणेष्वर्थेषु निपातसंज्ञो
भवति॥ हुं गेण्ह अप्पणो ज्ञेअं॥ पृच्छायां॥ हुं साहसु सम्भावं॥ निर्द्धारणे॥ हुं वसुं तुण्हिक्को॥ १॥ चिअ चेअ अवधारणे॥ एवं चेअ॥ २॥
ओ सूचनापश्चात्तापविकल्पेषु॥ ओ इत्ययं शब्दः सूचनापश्चात्तापविकल्पेषु निपातसंज्ञो भवति॥ ओ चिरइसि गाथा सुद्दहृव्यः॥ ३॥
इर किर किल अनिश्चिताख्याने॥ इर किर किला इत्येते शब्दा अनिश्चिताख्याने निपातसंज्ञका भवंति॥ पेछइ रत्तेणाहरो॥ अज्ज
किरतेण पवसिअ॥ अज्ज किल सिविणए॥ ४॥ हं क्खु निश्चयवितर्कसंभावनेषु॥ हं क्खु इत्येतौ निश्चयवितर्कसंभावनासु नि

प्राकृतम
२२

पातसंज्ञौ भवतः ॥ ५ ॥ णवर केवले । णवर इत्ययं शब्दः केवलेऽर्थे निपातसंज्ञो भवति । णवरि आ ॥ ६ ॥ किणो प्रश्ने । किणो इत्ययं शब्दः
प्रश्ने निपातसंज्ञो भवति ॥ किणो हससि ॥ ७ ॥ अव्वो दुःखसूचनासंभावनेषु ॥ अ इत्ययं शब्दो दुःखसूचनासंभावनेषु निपातसंज्ञो
भवति । दुःखे । अव्वो कज्जलरसरंजिएहिं अक्खीहिं । अव्वो अवरं बिआ । अव्वो णमिवानुं । अव्वो कज्जलरसरंजिताभ्यामक्षिभ्यां ॥
अव्वो अपरमिव । अव्वो येन मिवानुं ॥ ८ ॥ अलाहि निवारणे ॥ अलाहि इत्ययं शब्दो निवारणे निपातसंज्ञो भवति । अलाहि कुलु
न्नेषणे ॥ अलाहि । कअसे अवधारणे ॥ ९ ॥ अइ वल संभाषणे । अइ वले इत्येतौ शब्दौ संभाषणे निपातसंज्ञौ भवतः ॥ अइ मूलं । व
स इह वे किंके अलहे अवले ॥ १० ॥ णवि वैपरीत्ये । णवि इत्ययं वैपरीत्ये निपातसंज्ञो भवति । णविनय हं सि अवालु ॥ ११ ॥ सू कुत्सा
यां ॥ सू इत्ययं शब्दः कुत्सायां निपातसंज्ञो भवति । सू सिविणो ॥ १२ ॥ रे अरे हिरे संभाषणरतिकलहाक्षेपेषु ॥ रे अरे हिरे इत्येते शब्दाः
संभाषणरतिकलहाक्षेपेषु निपातसंज्ञा भवंति । यथा सरव्वंरे यथा । माकार हिरे । माकुरु घेरे । ज्ञातो सि अरे । ज्ञातो सि अरे । अरे हिरे ।
यथा । णओसि अरे हिरे ॥ १३ ॥ मिवमि अविवा इवार्थे ॥ मिवमि अविव इत्येते शब्दाः इवार्थे निपातसंज्ञका भवंति ॥ गअणमिव
वात अस्मिव । गअणं विवकमलणं ॥ १४ ॥ शेषः संस्कृतात् ॥ उक्तादन्यः शेषः । प्रत्ययसमासतद्धितलिंगवर्णकादिविधिः शेषः सं

राम
२२

स्कृतादवगंतव्यं॥ इह ग्रंथविस्तरभयान्नदर्शितिः॥ १५॥ ॥इति श्रीवररुचिकृते प्राकृतप्रकाशे नवमः परिछेदः॥ ९॥ ॥
पैशाची॥ पिशाचानां भाषा पैशाची॥ सा च लक्षलक्षणाभ्यां स्फुरीक्रियते॥ ॥प्रकृतिः सौरसेनी॥ अस्याः पैशाच्याः प्रकृतिः सौ
रसेनी। स्थिते। सौरसेन्यां पैशाचीलक्षणं प्रवर्त्तयितव्यं॥ वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ॥ वर्गाणां तृतीयचतुर्थयोर्वर्ण
योरयुजोरनाद्योर्वर्त्तमानयोः स्थाने आद्यौ प्रथमद्वितीयौ भवतः॥ गकनं। मेखो। एचाणिकरो। वरीसं। दशवतनं। वतनो। माधवे
वधो। गोपिंनो। केसवो। सरयुसं। सलफा॥ अयुजोरितिकिं॥ संगामो। वग्घो इत्यादि॥ अनादाविति किं। मनं इत्यादि॥ इवस्य पिवः
इवशब्दस्य स्थाने पिव इत्ययमादेशो भवति॥ कमलं पिव मुखं॥ णो नः॥ णकारस्य स्थाने नकार इत्ययमादेशो भवति॥ नलुनी॥
ष्टस्य सटः॥ ष्ट इत्यस्य स्थाने सट इत्ययमादेशो भवति॥ कसटं। समवे दृष्टि। स्नस्य सनः॥ स्न इत्यस्य स्थाने सन इत्ययमादेशो भवति॥
सनानं। र्यस्य रिअः॥ र्य इत्यस्य स्थाने रिअ इत्ययमादेशो भवति॥ भरिआ॥ ज्ञस्य ञ्ञः॥ ज्ञ इत्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति॥ केञ्ञ
ञ्ञेचो। ञ्ञेरादस्य। सौरसेनीसाधितस्य च्चे इत्ययमादेशो भवति॥ कञ्ञा। राञ्ञो राविट्टाङ्। सिङ्। सट्टि सुवा। राजन्शब्दस्य। टाङ्। ङि। ङ
सिङ्॥ इत्येतेषु परतः राचि इत्ययमादेशो वा भवति॥ राचिना। रञ्ञा॥ राचिनि। रञ्ञि॥ एतेष्विति किं॥ राचा। राचानो। रञ्ञो॥ त्क्तस्तूनं

॥प्राकृत म॥
॥२३॥

क्वाप्रत्ययस्य स्थाने तूनं इत्ययमादेशो भवति॥ सुनाहि। सुनाऽटारी ति किं। सुनचि सिद्धइति किं। चनतु। हृदयस्य हितपकं॥ हृदय
शब्दस्य हितपकं निपात्यते। हितपकं हरसि मे नलुनि॥ ॥इति श्री वररुचि विरचिते प्राकृत प्रकाशे मनोरमायां रत्नौ पैशाचिको
ध्यायो दशमः परिछेदः॥ ॥अथ मागधी प्रकृतिः॥ सौरसेनी॥ षसोः शः॥ षकार सकारयोः स्थाने शो भव तिं॥ माशो॥ विला
शो॥ जो यः॥ जकारस्य यकारो भवति। यापदे। चवर्गस्य स्पष्टता तथोच्चारणः॥ चवर्गीय थोस्पष्ट तथोच्चारणो भवति॥ पलिचुओ
गलिदछले। विजलीणि स्खलो॥ हृदयस्य हडक्कः॥ हृदयस्य स्थाने हडक्को भवति॥ हडक्के॥ आलते ममपर्जयोर्यः॥ पर्जयो स्थाने
य्यो भवति। कय्यो। दुय्यणो॥ क्षस्य स्कः॥ क्षस्य स्थाने स्ककारो भवति॥ लस्करो॥ अस्मदः॥ सो हके हगे॥ अस्मदः स्थाने सौ परतः
हके हगे इत्येतौ स्तः॥ हके भणामि। हगे भणामि॥ अतइदेतौ लुक् च॥ सौ इत्यनुवर्त्तते॥ अकारान्ताच्छब्दात् सौ परतः इकारेकारौ भवतः॥
पक्षे सो पश्च। हस्ते त्य प्रदि। एश मासा। एशो पुलिसे। यथा। पुलिश। एशो समा॥ क्तांतादुश्च। क्तप्रत्ययांताछब्दात् सौ परत उ
कारश्च भवति॥ चकारादिदेतौ लुक् च॥ हसिदु। हसिदि। हसिदे। हसिदो। उ• सो हो वा दीर्घत्वं च॥ पुलिसा हधने। पुलिसस्स धने।
अदीर्घः संबुद्धौ॥ अतो नादित्येव। अदन्ताछब्दात् हकारो दीर्घो भवति॥ संबुद्धो॥ पुलिसा। आगछ। मनुसा। आगछ। संबुद्धौ इति किं॥

॥राम॥
॥२३॥

॥प्राकृतम०॥
॥२४॥

वत्तणस्स घनेण्गि ह्रस्व विष्ठः। विहत्थी इ स्थाने विश इत्ययमादेशो भवति। पुलिल्ले विष्ठहि। कअस्स अगमान्तस्य डः। डक
अकरणे। मृ अप्राणयोगे गुम्म स्पृ फुम्गतौ। एतेषां क्त प्रत्ययस्य स्थाने डकारो भवति। कडे। मडे। गडे। क्तो दाणिः। क्ता प्रत्यय
स्य स्थाने दाणि इत्ययमादेशो भवति। सहि दाणि गत्वा। सृगालस्य शिआल शिआलो। शिआलको। सृगालशब्दस्य स्थाने शि
अला द यः आदेशा भवन्ति। शिअला अच्छदि। शिआले आअच्छदि। शिआलके आअच्छदि। इति वररुचिविरचितायां प्रा
कृतप्रकाशे मनोरमायां वृत्तौ मागध्यपरनामकः एकादशः परिच्छेदः॥ ११॥ ॥ सौरसेनी प्रकृतिः संस्कृतं। अनादावयुतः। तथयोर्द
धौ। व्यापृतः। पुत्रोत्कंचित। इग्रं गृध्रे। समे सु। ब्रह्मण्यविज्ञकन्यकानां न्यस्य वा ञः। सर्वज्ञ इति। गिलयोस्यः। क्त्वाऽअः। कृगमोर्
अः। तिर्जस्ससोर्वा। क्लीबे दीर्घश्च। भो भूदे स्तुडिः। नल्टि तिन्दाते दे। इत्यस्य ल्टि डु। कृ अः। करः। स्पृश्चि डुः। स्मरतेः सुमरः। दृशोः पे
क्खः। अस्तेरकः। सिपा थेः। भवसि स्यति। मिपा संवा। स्वरदीर्घत्वं च। स्त्रियां इत्थी। णवस्य व वा। इत्यस्य विआ। अस्मदो जस्सा वअं च।
सर्वनाम्नाङसि ल्वो था। णो नवि। कर्तृकर्मसु परस्मैपदं। अनेन त्य एद्दा। मिषाले दिवः। आश्चर्ये साच्छरिअं। अस्मदो डं इदं शने पु
शेषं महाराष्ट्रीवत्। इति श्रीवररुचिविरचितायां मनोरमायां वृत्तौ सौरसेनीलक्षणं द्वादशः परिच्छेदः। समाप्तश्चायं प्राकृतमनोरमा॥

॥राम
॥२४

॥ प्राकृतमनोरमा बालकृष्णदत्तपुत्रस्य ॥
॥ सर्वत्रोपयोगीयं छंदवंदप्रबंधेषु ॥ अलंका
॥ रसाहित्यनृत्यगीते च ॥ ॥ ७ ॥ ॥ ७ ॥

[OrderDescription]
,CREATED=02.06.20 15:21
,TRANSFERRED=2020/06/02 at 15:29:26
,PAGES=50
,TYPE=STD
,NAME=S0003060
,Book Name=M-2959-PRAKIRT MANORMA BHASHA PRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,